ननु जीव एक आहोस्विन्नानेति संशये कश्चिद्दुःखी कश्चित्सुखीति दर्शनेन नानात्वस्यैव कल्पनीयत्वात्। न च पादे मे सुखं पादान्तरे मे दुःखमित्यादिवच्छरीरभेदेनैकस्यापि सुखदुःखे यदि स्यातां तर्हि को दोष इतिवाच्यम् तथा सति योहं देवदत्तः सुखी सोहं यज्ञदत्तो दुःखीति प्रतिसन्धानप्रसंगात्। नचाविद्यावशादात्मनोऽपि सुखादयोनात्मीयतया प्रतिसन्धीयन्त इति वाच्यम् यज्ञदत्तवद् देवदत्तेनापि आत्मीयतयाऽप्रतिपत्तिप्रसङ्गात्। तस्माज्जीवः प्रतिशरीरं भिन्न एव। एतेनैक एव जीवः कल्पक अन्ये तु सर्वे कल्पिता इति मतमपास्तम्। इत्युक्त प्रकारेण जीववह्मणोरैक्ये निरस्ते तदुपजीवका वेदान्तदर्शने प्रवलिताः प्रतिबिम्बावच्छेदाः अंशभास प्रकृतिवादाः परास्ताः।

ननु जीवोऽणुरथवा विभुरिति संशये, अणुरिति पूर्वपक्षः। कुतः उत्क्रान्ति-गति-श्रवणानुपपत्या 'अणुर्ह्येवैष आत्मा यं वा ते सिनीतः पुण्यं पापं च' बालाग्रशतभागस्य जोवोभागः सविज्ञेय इत्यणुत्वश्रवणेन च अणुरेव जीवः, न च पादे वेदना शिरसि सुखमित्यादौ सुखदुःखानाम् ज्ञानानुपत्तिरिति वाच्यम्। प्रदीपप्रभान्यायेन आश्रयातिरिक्तप्रदेशविशेषव्यापिगुणतया सर्वाङ्गीण सुखदुःखानां ज्ञानस्योपपत्तेः। एवञ्च करशिरश्चरणाद्यनुगतेषु सुखदुःखादियोगपद्यं कायव्यूहगतेषु योगिनां भोगवैचित्र्यञ्चेत्यस्याप्युपपत्तिः। एवञ्च जीवानामणुत्वेनाशङ्कात् सुखदुःखादिविभोरीश्वराद्भेदश्चेति चेन्न चैत्रस्य पादे वेदना शिरसि सुखमिति स्वांशभेदगतसुखदुःखानुसन्धानवत् मत्रगतसुखदुःखानुसन्धानस्यापि दुर्वारत्वात्। तस्माद्विभुरेव जीवात्मेति सिद्धमिति यथा विभुत्वान्महानाकाशः तथात्मेति विभुत्वस्वीकारादेव तत्कार्यस्य ज्ञानसुखादेः सर्वत्र दर्शनात् अन्यथा मथुरायामुत्पन्नस्य देवदत्तस्योपभोगाय कारणं तद्दृष्टवशाद् न कश्चिद् पदार्थ उत्पद्येत लोके त्वेवं दृश्यते दूरस्योत्पन्नं पदार्थं प्राप्य सुखिनो दुःखिनो भवन्ति जनाः।

ननु बन्धमोक्षव्यवस्थासिद्धयर्थं जीवस्य नानात्वमङ्गीकृतं तत्र कस्तावन्मुक्तपदार्थ इति दुःखात्यन्ताभावो मुक्तिरिति।

स्वामिश्रीभगवदाचार्य-

प्रणीतं

विशिष्टाद्वैतदर्शनम्

तस्यैव किञ्चित्प्रास्ताविकम्

बहवो जानन्ति, बहवो नापि जानन्ति श्रीरामानन्दसम्प्रदायस्याहमेव विधातेति। बहवो ज्ञात्वापि तत्त्वमेतन्मनःश्यामतयाजानाना इव मन्दभाग्या दुर्धियः खिन्नधियश्चावतिष्ठन्ते। केचन निस्त्रपा मानलोलुपा धनखलप्वो बुद्धया पीनाः कुपितकौपीनास्त्वन्यथापि वदन्ति। अस्तु किमनेन।

श्रीरामानन्दाचार्या यावनराज्ये भारताजिरमलङ्कुर्वाणा आसन्। तेषामपावनयावनक्रीडातिपीडाकर्यासीत्। अतस्तच्छममनसः सुमनसस्ते नावकाशमवापुर्ग्रन्थग्रथनप्रथनकार्याय। तैः किमपि न लिखितं सम्प्रदायमुपलक्ष्य। आनन्दभाष्यनामकं

वेदान्तसूत्रभाष्यं तु स्वयं निरानन्दं सदन्येषामपि शान्तिकान्तिमचूचुरत् । चौर्यकर्मणि निरता एव वैदुष्यविरताः केचन दौर्भाग्यकशाताडिताः कथयन्ति प्रचारयन्ति चानन्दभाष्यस्य विधाता रामानन्दस्वाम्येवेति । श्रीरामानन्दस्वामिवैदुष्यादूष्यप्रवाहस्तु केवलं काशीस्थनागरीप्रचारिणीत्यभिहितया सभया प्रकाशिते "रामानन्द की रचनाएँ" इति नामधेयेति संक्षिप्ते पुस्तके निरवग्रहः सुग्रहः । श्रीरामानन्दसम्प्रदायस्य जनकत्वं तु मय्येवावस्थितमिति कथा प्रामाणिकपथप्रथिता सार्वजनप्रसिद्धा च । अमराणां पामराणां चाप्याननात्सत्रा सर्वत्र श्रूयते रामानन्दपन्थस्य साधारणी ? वैष्णवेतिप्रसिद्धस्य समुद्धारको भगवदाचार्य एवेति ।

श्रीरामानन्दस्वामिश्रीसंवर्धनाय बहोः कालात्पूर्वं श्रीरामानन्ददिग्विजय इत्याख्यं महाकाव्यं देवाधिदेवभाषया चिराद-भिलषितं मयैव विरचितम् ।

परं श्रीरामानन्दाचार्याः श्रीवैष्णवाचार्या आसन्नित्यत्र नाद्य कोपि कोप्यपि विवदते । तर्हि तेषां कैरपि नियतैर्महायतैः सिद्धान्तैर्भाव्यमेवेति विभाव्य समेषामेषां विदुषामवगतये मयैष ग्रन्थः समग्रन्थि ।

अस्मिन्विशिष्टाद्वैतदर्शने निदर्शनभूते यानि कान्यपि सिद्धान्तरमणीयरत्नानि निहितानि सन्ति तानि निखिलान्येव प्रायेण न्यायपरिशुद्धेर्न्यायसाराख्यायास्तदीयव्याख्यायाश्च चितानि सञ्चितानि च तेषामेवाक्षराक्षराणि । गौतमीयन्यायदर्शनतो वात्स्यायनभाष्यतो विश्वनाथकृतवृत्तिग्रन्थतोपि च साहाय्यमवापि मया । तेषामेव वाक्यान्यत्र सूत्रतां गमितानि । न्यायदर्शनतस्तु बहूनि सूत्राण्यविकलान्येव मयात्रोद्धृतान्यनुद्धतेन । एष एवात्र मम प्रशमः श्रमः । एतस्य सर्वसम्मतस्य ग्रन्थस्य नवनिर्माणे नातानि मया मतिर्मदीयेति । तथाकृते तु स्यात्तत्केवलं पाषण्डखण्डमेव । नाहं पाषण्डप्रियः । अतो यथा यतीन्द्रमतदीपिका-कारेण निरहङ्कारेणेतस्ततः प्रसृताः सिता व्यवस्थिताश्च विशिष्टाद्वैतसिद्धान्ता यतीन्द्रमतदीपिकायां समग्राहिषत यथा वा तट्टीकाकृता श्रीवासुदेवाभ्यङ्करेण तट्टीकाक्षराणि प्रायेण न्यायशुद्धेरेव संगृहीतान्यन्यतोपि च तथैव मयापि सद्वर्त्मावापि । यतीन्द्रमतदीपिकातोपि न्यायपरिशुद्धेरपि न्यायसारतोपि तत्त्वमुक्ताकलापतोपि न्यायसिद्धाञ्जनतोपि सिद्धान्तसिद्धाञ्जनतोप्यन्य-तोपि च सिद्धान्तरत्ननिचयमवचित्य निदर्शनीभूतमिदं दर्शनं प्राणायि समस्कारि च तत्तद्ग्रन्थीयतत्तत्स्थलीयभाष्याक्षरैः । क्वचित्क्वचिच्च मयापि विवृतानि स्पष्टीकृतानि च तान्यक्षराणीति विदन्तुतमां विशिष्टाद्वैतवेदान्तविद्यावेत्तृतमाः । नात्र चौर्य-चातुरी न वा वैदुष्यपाषण्डो न चाहङ्कारभूमिर्न वा गौरवजिघृक्षा न वान्येषां पण्डितम्मन्यानामपमित्सा सम्प्रदायिब्रुवाणाम-कर्मणां पण्डितनराणां रामानन्दीयानाम् । केवलमीदृग्ग्रन्थाभावगर्ताभावचिकीर्षयैव श्रीसम्प्रदायस्योन्निनीषयैव च श्रम-मिमशिश्रियम् ।

अयि पारमेश्वराः, ग्रन्थममुं भवतां भवदीयानां च भव्ये नव्ये च करपल्लवे समर्प्य कणेहत्य स्वपिमि, उपाजेकृत्य च कार्तार्थ्यमनुभवामि । वैपरीत्यं परीत्य स्थितं जगन्नाथं प्राध्वीकृत्य प्राध्वं कृत्वा वा सयुगलकरसम्पुटं याचे ममैव पद्येनैतेन—

रामानन्दान्नमय नितरां राम-विद्याप्रदानैः, सत्ये भूयाद्रतिरतितमां मास्त्वसत्ये हि तेषाम् ।
धर्मे धीरा धृतिरिह भवेत्सत्कृतिः कीर्तनीया, वन्द्याः स्युर्मा दनुजमनुजा मानवा मानवाः स्युः ॥

किञ्चोदारदया अदया अपि सुविचारा दुर्विचारा अपि सत्पथपथिका असत्पथपथिका अपि निरभिमानाः साभिमाना अपि सद्गुणगणग्रहणप्रवणा असद्धीधराधरणप्रवणा अपि रक्षोक्षिपक्षकक्षामुपेक्ष्य दयादृशमुपस्पृश्य ग्रन्थस्यैतस्य दोषानपसार्य प्रसारयिष्यन्त्येतद्ग्रन्थगतश्रीवैष्णवसम्प्रदायसम्मतसुमततत्त्वानीति भृशं बिभर्मि प्रमोदसम्भाव्यसभारभारमिति ।

सर्वैर्मुनिवरैर्नित्यमृषिभिश्च विदांवरैः ।
ध्यातं किमपि सत्तत्वं श्यामं श्यतु मनोरुजः ॥ १ ॥
यतिराज - महाराजरामानन्दार्यं - पादुके ।
परित्राणाय लोकानां जयतां शर्मसाधिके ॥ २ ॥
स्वामी भगवदाचार्यः सर्वशास्त्रविशारदः ।
रामानन्दमतं ह्यत्र विवृणोति सुखाकरम् ॥ ३ ॥
लौकिकैर्वैदिकैः शब्दैर्यतिराजमतं ततम् ।
सर्वजीवहितायैव सूत्रैरत्र निरूप्यते ॥ ४ ॥
विशिष्टाद्वैत-सिद्धान्त-साम्राज्यं समपूपुषन् ।
आचार्याः पूर्वजा ये ते भृशं पुष्णन्तु मे दृशम् ॥ ५ ॥
विशिष्टाद्वैतसिद्धान्तसाम्राज्यधरणीधृताम् ।
आचार्याणां पदाम्भोजपरागाः सन्तु मे हिताः ॥ ६ ॥

अथ प्रथमाध्याये प्रथमः पादः

अथातो विशिष्टाद्वैतसिद्धान्ताः ॥१॥१॥१॥

अथशब्दोत्र मङ्गलार्थकः । प्रारम्भार्थको वा । इतः प्रारभ्य विशिष्टाद्वैतसिद्धान्ताः सूत्र्यन्ते । प्रलयावस्थायां ब्रह्म सूक्ष्मचिदचिद्विशिष्टं भवति । सृष्टिदशायां च स्थूलचिदचिद्विशिष्टं भवतीत्येवं कालभेदेन ब्रह्मणो द्वे अवस्थे । विशिष्टशब्द एव तदवस्थाद्वयं निर्वाहयतीति लाघवात्सूक्ष्मचिदचिदिति स्थूलचिदचिदिति विशेषणद्वयं परित्यज्य विशिष्टं च विशिष्टं च विशिष्टे इति द्वन्द्वसमासः । तयोर्विशिष्टयोरद्वैतं विशिष्टाद्वैतम् । द्वयोर्भावो द्वित्वैव द्वैतम् । न द्वैतमद्वैतम् । अद्वैतमभेदः । विशिष्टयोरद्वैतम् विशिष्टाद्वैतम् । सूक्ष्मचिदचिदात्मकशरीरविशिष्टस्य कारणस्य ब्रह्मणः स्थूलचिदचिदात्मकशरीरविशिष्टस्य कार्यस्य च ब्रह्मण ऐक्यम् इति तात्पर्यम् । "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति" (बृह० १४।६।७।७) इति श्रुत्यनुसारेण पृथिव्यादिकं सर्वमचित्तत्वं ब्रह्मणः शरीरम् । तत्रैव यस्यात्मा शरीरमित्यादिश्रुतिबलेनात्मनोपि ब्रह्मणः शरीरत्वमेव । एवं च ब्रह्मणः शरीरित्वं समायातम् । शरीरशरीरिणोरभेदोप्यभिमतः । वस्तुतस्तु भेद एव ।

ननु द्वैतं तु लोकसिद्धं लोकप्रसिद्धं च । अद्वैतमपि शास्त्रसिद्धम् । किमिदं विशिष्टाद्वैतं नाम ? पूर्वमुक्तमेव । अधिकं श्रूयताम । ब्रह्म तु सर्वदैकं नित्यं कूटस्थमविकारि च । ब्रह्मणः शरीरद्वयम । नित्य अनित्येति । चिद् जीवः । अचित् प्रकृतिः । स्वेच्छया येन यदुपभुज्यते तत् तस्य शरीरम् । चितो भगवत्पारतन्त्र्यात् भगवता स्वेच्छयैव तस्या उपयोगः क्रियते । जीवकृतकर्मण्यपेक्ष्य जीवांस्तत्तत्कर्मफलभोगेषु नियोजयति भगवांस्तत्र तस्य स्वेच्छैव प्रमाणम् । केन जीवेन किं कर्म कृतं किं च तस्य फलं कियत् तेन भोक्तव्यमित्यत्र सर्वतन्त्रस्वतन्त्रो न्यायशीलः परमकृपालुर्भगवानेव प्रमाणम् ।

ननु शरीरिणा शरीरोपयोगः स्वार्थायापि परार्थायापि च क्रियते । यदि जीवो ब्रह्मशरीरं तर्हि ब्रह्मणः को नाम स्वार्थोपयोगः ? नास्त्येव तस्य कश्चन स्वार्थः । सत्यम् । श्रोतव्यम् । पुत्रः पितुः शासने स्थित्वा धर्म्याणि कर्माणि कुर्यादिति यथा पितुः स्वार्थस्तथैव पुत्रस्थानीया जीवा भगवदाज्ञामनुसृत्य भगवत्प्रसादकान्येवान्यजीवहितेच्छया दयादाक्षिण्यादीनि सत्कर्माणि कुर्युरिति जीवकल्याणकारी भगवतः स्वार्थः । सर्व एव जीवाः स्वे आत्मीया मामका इतिविधया जीवेषु स्वत्वं संनिधाय सर्वान् स्वत्वेन स्वकीयत्वेन वा स्वीकुरुते भगवांस्तान् ।

ननु अस्ति ब्रह्मेत्यत्र किं प्रमाणम् ? अस्मत्कुलपरम्परातः प्राप्तानि सच्छास्त्राण्येव प्रमाणम् । कुलाचारोपि । न तत्सिद्धावनुमानप्रवेशः । अनुमानसिद्धं ब्रह्म केनापि प्रबलेनानुमानेनासिद्धमपि स्यात् । अत एवाथातो ब्रह्मजिज्ञासेत्युक्त्वा किं तद्ब्रह्मेति प्रश्नमुत्थाप्योक्तं जन्माद्यस्य यत इति वेदान्तदर्शने । सृष्टिस्थितिलयकारणत्वेनैव ब्रह्म प्रतिपादितम् । तत्र चानुमानप्रसंगभङ्गायैव "यतो वा इमानि" इति श्रुतिर्जन्म गृहीतवती । उपमानस्यापि न तत्र प्रसरावसरः । साम्यावलम्बिनीं ह्युपमानगतिः । न हि भगवतः केनापि सह कथमपि साम्यमास्थीयत आस्थादिधनैर्विद्याधनैः । प्रत्यक्षं न कक्षीकर्तुं योग्यम् । रूपराहित्यात् । नन्वस्त्येव रूपं भगवतो नीलाम्बुजश्याममितिशुक्लाम्बरधरमित्यादिप्रसिद्धेरिति वाच्यम् । नीलं श्यामम् । तच्च शृङ्गाररसस्य रूपं साहित्याचार्यैः स्वीकृतम् । तथाहि "स्थायी भावो रतिः श्यामवर्णोयं विष्णुदैवतः" इति विश्वनाथः साहित्यदर्पणे । भगवद्बालरूपोपासकैः शृङ्गारादि-

साहित्येन भगवति नीलरूपताऽऽरोपिता। "उपासनार्थं हि लोकानां भगवति रूपकल्पना" इत्यर्थकं हि वाक्यं पाञ्चरात्रग्रन्थ उपलभ्यते। तच्च वाक्यम्—भक्तानां हि सिद्ध्यर्थं ब्रह्मणो रूपकल्पनेत्यादि। मानसं प्रत्यक्षं तु यस्य स्यात्तस्यैव कार्तार्थ्यं नान्यस्य। न तत्र वाग् गच्छति न मनो गच्छतीति न तत्र वागादीनामवसरः। यथा क्षुधार्दितः पुरुषः क्षुच्छान्त्युपयोगि यत्किञ्चिद्वस्तूपलभ्य शान्तिमनुभवति एवं जगद्वृजार्दितो जनो यत्किमपि तत्त्वमाश्रित्य शान्तिमनुभवति तदेव तत्त्वं तस्य ब्रह्मेति। ब्रह्म यदुपनिषत्सु प्रतिपादितं तत्तु वाचामगोचरम्। न तत्र चक्षुरिन्द्रियायनम्। न हि श्रोत्रेन्द्रियं प्राप्तपराक्रमम्। अतस्तस्य मानसमेव प्रत्यक्षं शरणम्। वस्तुतस्तु मूकगुडायितं ब्रह्म। न हि गुडभक्षको मूको गुडास्वादं वर्णयितुमलम्। ब्रह्मप्रत्यक्षकर्ता न कोपि ब्रह्म विवरीतुं सामर्थ्यं समर्थयते। तदस्तीत्येतेनैव संतोष्टव्यम्। न ह्येतेनैव। अदृष्टमपि तदपोहत्येव दुःखिनां दुखं दुःखराशिं च। अदृष्टमपि तत्सुखयत्येवान्तरं तत्त्वं मानवानाम्। अनिरीक्षितमपि तद्भवत्येव प्रेमास्पदं पुण्यवताम्। अनवेक्षितमपि तदवेक्षितमिव कदाचन भवत्तत्तज्जीवानामशान्तिं शमयत्येव। तत्साकारं वा निराकारं वेति चिन्तापि न विचिन्तनीया। अदृश्ये वस्तुनि कः कथं जिह्वां व्यापारयेत्? तन्निराकारं वा स्यात्साकारं वा स्यात्, अणु वा स्यान्महद्वा स्यात्, लघु वा स्याद्दीर्घं वा स्यात्, स्त्री वा स्यात्पुमान्वा स्यात्, बालो वा स्याद्वृद्धो वा स्यात्, यः कोपि स स्यात्, या कापि सा स्यात्, यत्किमपि तत्स्यात्, अस्त्येव तत्तत्त्वमस्माकमान्तरतत्त्वाह्लादकम्। आह्लादकत्वेनैव तदिष्यते नान्यथाकारेण। स्थाय्याह्लादस्य जनकत्वं यस्य तस्यैव ब्रह्मत्वम्। यथा दूरस्थः कोपि पुमान् पुत्रवन्तं कमपि पुरुषं न प्रमाणयितुं शक्तिमान् भवति स पुत्रीति। एवं न ब्रह्मोपासकोपि ब्रह्मप्रसादप्रसादितोपि कोपि प्रत्याययितुं शक्नोति ब्रह्मास्तीति। न च मा भूत्समर्थो दूरस्थः कोप्यात्मानं पुत्रवानिति प्रत्याययितुम्, उपासकस्तु न भवति दूर उपास्याद्ब्रह्मणः, कथं न तर्हि तत्प्रत्याययेत्स ब्रह्मास्तीति, इयमस्तीति, एतादृशमस्तीति? न प्रत्याययेत्। गुडास्वादको विदितगुडास्वादं न प्रत्याययितुं शक्नोति प्रयत्नपरम्परयापि गुडं मधुरमिति। अतोस्त्येव ब्रह्म कर्तुमकर्तुमन्यथाकर्तुं किमपि सामर्थ्यवदित्येतेनैव संतोष्टव्यम्। यदि सूरदासेन तुलसीदासेन वान्येन केनापि वा प्रत्यक्षितं तद्ब्रह्मेति कस्यचिद्विश्वासश्चेत्सुखं शयीत सः। यस्य येन वस्तुना येन प्रकारेण वा स्यादात्मतोषस्तेनैव स धन्यः। न तत्र कश्चन कस्यचिद्विद्वेषो मात्सर्यं वेत्यलमतिविस्तरेणेति। अधिकं ब्रह्मनिरूपणावसरे वक्ष्याम इति ॥१॥१॥१॥

तत्त्वज्ञानं तत्त्वाप्तये ॥१।१।२॥

तत्त्वज्ञानमपेक्षितम्। किमर्थम्? तत्त्वाप्तये तत्त्वप्राप्तये। न हि तत्त्वज्ञानतत्त्वप्राप्त्योः कार्यकारणभावः। तत्त्वज्ञानमेव तत्त्वप्राप्तिरिति तु न विवदितव्यम्। गुडज्ञानमेव गुडप्राप्तिर्न भवति। गङ्गाज्ञानमेव गङ्गास्नानं न भवति। दुरितज्ञानमेव न दुरिताय भवति। पुण्यज्ञानमेव न भवति पुण्या। न हि पुण्यज्ञानमात्रेण पुण्यप्रसरो न वा पापज्ञानमात्रेण पापावसरः। ज्ञानेन ज्ञातस्य वस्तुन उपयोगेन सुकृतं वा दुष्कृतं वा निष्पद्यते। अतः सुष्ठूक्तं तत्त्वज्ञानं तत्त्वस्य प्राप्तये भवतीति ॥१।१।२॥

त्रीणि तत्त्वानि ॥१।१।३॥

कियन्ति तानि तत्त्वानीति जिज्ञासमानायोक्तं त्रीणीति ॥१।१।३॥

चिदचिद्ब्रह्मेति ॥१।१।४॥

कानि त्रीणीति नाम्ना विवृणोति चिदिति अचिदिति ब्रह्मेति च। इतिशब्दोत्र मोक्षप्रापकतत्त्वान्तरधीनिवर्तकः। एतेषामेव ज्ञानेन निःश्रेयससिद्धिः। ननु तच्छब्दप्रतिपाद्यब्रह्मज्ञानेनैव मुमुक्षूणां मुक्तिरिति सर्वार्षार्ष्यशास्त्राणां निर्घोषः कथं तर्हि तत्त्वत्रयाधिगमेन निःश्रेयसाधिगमोद्घोष इति? सत्यम्। ब्रह्मज्ञानमेव मुक्तिसाधकम्। यज्ञेनैव स्वर्गावाप्तिः। मन्त्रेध्माज्यानलाः संभूय यज्ञं निर्वाहयन्ति यज्ञश्च स्वर्गं प्रापयति यज्ञकर्तारम्। एवं चिदचितौ ब्रह्मविशेषणे सम्भूय चिदचितोर्धार्यत्वं पोषकत्वं नियाम्यत्वं ब्रह्माधीनमिति विज्ञापयन्ती ब्रह्माङ्गतां च दधती ब्रह्माभिन्ने भवतः। शरीर शरीरिणोरभिन्नत्वस्वीकारात्। एवं च चिदचिद्ब्रह्मज्ञानं संभूयैव ब्रह्मज्ञानपदाभिलष्यं भवति। एवं च त्रीण्येव तत्त्वानि। तेषां च पूर्वोक्तदिशाभेदः। अथवा यद्यस्त्येव कश्चन मत्सरोऽत्रसिद्धान्ते तर्हि ब्रह्मज्ञानेनैव

मुक्तिरवधार्यताम् । तत्त्वद्वयज्ञानं च तत्र साहाय्यं विरचयति । कथं तत्र तस्य साहाय्यमिति चेच्छृणु । चित् जीवः । स तु चेतनः सन्नपि पापकारी पुण्यकारी च भवति । एवं च स स्वरूपमवबुध्योपासनया भक्त्या प्रपत्त्या च विशुद्धज्ञानाकारो भवन् मुक्तिप्राप्तियोग्यतामादधानो ब्रह्मेप्सति प्राप्नोति च । अचिदपि ब्रह्मानुसंदधानमात्मानं परित्यज्य ब्रह्मावाप्तये तस्य साहाय्यं करोति । पथि कण्टकानाच्छादनमेव पथिकस्य साहाय्यम् । विचित्ररूपा बहुरूपा चाचित् प्रकृतीत्यपरनामधेया बहुविघ्नकारिणी । विघ्नापनोदनमेव तत्र तत्साहाय्यम् । ननु विघ्नक्रियाकारित्वं विघ्नापनोदनक्रियाकारित्वं च कथं जडायां प्रकृताविति चेत्, रथो गच्छतीतिवत्समाधेयम् । रथस्य जडत्वेन गमनक्रियाया असम्भवादपि तत्र रथयुक्ताश्वक्रियावशात्तत्रापि गमनक्रियाव्यवहारः । एवम् अचिदपि चित्साहाय्येनैव स्वधर्मं निर्वहियतीति । तर्हि चित्येव दोषः । न हि कश्चन चेतनः स्वरूपं दूषयतः कस्यापि साहाय्यमातनुते । कथं तर्हि स्वमेवोपद्रवन्त्या अचितः साहाय्यं चिदाचरेदिति तु न विलम्बकारिणि पथि पादो निधेयः । पूर्वार्जितकर्मकूटसामर्थ्येन सर्वं सुलभमिति निर्धार्य शान्तिरालम्बनीयेति ॥१।१।४॥

चिज्जीवः ॥१।१।५॥

चिच्छब्देनात्र जीवो विवक्षितः । साम्प्रदायिकीयं परिभाषा । चिदेव जीवशब्देनात्मशब्देनाप्यालप्यते । चिनुते धर्मार्थकाममोक्षानिति चित् । चिनोति मुक्तिसाधनं भक्तिं प्रपत्तिमिति वा ॥१।१।५॥

स चाजडद्रव्यरूपः ॥१।१।६॥

प्रमेयं द्विविधम् । द्रव्याद्रव्यभेदात् । द्रव्यमपि द्विविधम् । जडाजडभेदात् । जीवोजडद्रव्यविशेषः । अजडश्चेतनः ॥१।१।६॥

प्रत्यक् ॥१।१।७॥

जीवस्वरूपं निरूपयति प्रत्यगिति । प्रत्यक्त्वं च स्वस्मै स्वेनावभासमानत्वम् । इदं प्रत्यक्त्वं जीवेश्वरयोरसाधारणो धर्मः ॥१।१।७॥

अणुः ॥१।१।८॥

अणुपरिमाणको जीवः । न स विभुः । तेन प्रद्योतेनैव आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वा अन्येभ्यो वा शरीरदेशेभ्य इति बृहदारण्यकवचनादात्मनो निष्क्रान्तिः श्रूयते । जीव एवात्मशब्दवाच्यः । ये वै केचनास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्तीति तत्रैव गतिरपि श्रूयते । तस्माल्लोकान्पुनरेत्यस्मै लोकाय कर्मणे इत्यत्रागतिरपि श्रूयते । निष्क्रान्तिगत्यागतीनां न हि विभुनि वस्तुनि कथमपि संभवः । अतः प्रामाणिकवचनबलादणुपरिमाणक एव जीवः । "बालाग्रशतभागस्य शतधा कल्पितस्य च । भागो जीवः स विज्ञेयः" इति श्वेताश्वतरवचनप्रमाण्यादपि जीवोऽणुपरिमाणकः । अणुरेष आत्मेत्यपि श्रूयते ।

ननु जीवोऽणुश्चेत् कथं युगपदनेकवस्तुज्ञानं संभवेत् ? इत्यलम् । ज्ञानानां यौगपद्यं तु भ्रमादेव प्रतिपाद्यम् । सर्वेषामेव ज्ञानानां साधनं तु मन एव । तस्यैकयादणुत्वाच्च न हि बहूनां ज्ञानानां यौगपद्यं साधयितुं योग्यम् । "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्" इति वदन् गोतमोपि भवतेरसाकमानुकूल्यम् ।

यदि स्यान्नामाग्रहो यौगपद्येन मनसो बहूनां विषयाणां ग्रहणे तर्हि जीवधर्मभूतज्ञानान्वितया सर्वं सिद्धं भवेदिति । वस्तुतस्तु धर्मभूतज्ञानसाहाय्येनापि न मनोणु विभिन्नविषयकं ज्ञानं यौगपद्येनाप्तुं शक्नुयात् । न हि सर्वव्यापकोपि परमेश्वरो वामनरूपेण एकेनैव पादेन त्रीनेव लोकानक्रमीत् किन्तु पादत्रयेणेति । शतशतदलच्छेदनन्यायेन न भवति क्रमोवगत इति त्वन्यत् । अत एव प्रज्ञया घ्राणं समारुह्य घ्राणेन सर्वान् गन्धान् आप्नोति, प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्वाणि रूपाणि पश्यतीति कौशीतकीवचनमपि अत्रैवानुकूल्यं सम्पादयति । घ्राणसमारोहणं चक्षुःसमारोहणं च न भवितुमर्हति यौगपद्येन । कालविम्बस्तत्रापेक्षितः ।

परमिदं त्ववधेयम्—श्रीसम्प्रदायदृष्ट्या जीवस्याणुपरिमाणवत्त्वमेव । यदि स विभुः स्यात् तथापि नास्माकं किंचिच्छिन्नं स्यात् । नैयायिकानां विभवोप्यात्मानो जनन-मरण-सरणादीन्यनुभवन्त्येव । न हि काचनापरा सृष्टिस्तेषाम् । कथं ते तथानुभवन्तीति तु नैयायिका एव प्रष्टव्याः । वयं तु श्रौतं मार्गं प्रतिपन्ना अणुपरिमाणग्रहग्राहग्रसिता इति न याथार्थ्येन तत्र प्रवेष्टुं शक्ताः । तद्विभुत्वानङ्गीकारोपि तत्तज्जीवा-

दृष्टजनितदेशान्तरफलोपलब्धिस्तु अदृष्टवशात् ॥१।१।८॥

शेषः ॥१।१।९॥

शेषशब्दोत्र साम्प्रदायिकः। शिष्यत इति शेष इति व्युत्पत्त्या तु परमेश्वर एव मुख्यतया शेषशब्दार्थो भवति। परन्तु नायं व्युत्पन्नः शब्दः। अव्युत्पन्न एव। अत एव रूढः। स्वेच्छानुकूलविनियोगार्ह इति तदर्थः ॥१।१।९॥

कर्ता ॥१।१।१०॥

सृष्टेः प्रवाहानादित्वेन कस्यामपि सृष्टौ यत्किञ्चिद्देहसम्बद्धो जीवो यत्किञ्चित्कर्म करोत्येव। देहवतात्मना तु किमपि कर्म कृतं भवत्येव। आ मुक्तेः संसारः। संसारिदशायां संसारोपयुक्तं कर्म क्रियत एव तेन। दग्धेत्र संसारबन्धने भगवत्सामीप्यं प्राप्य तत्रापि स्वेच्छया भगवदानुकूल्यं रिरक्षिषता जीवेन भगवदाराधनं कृतं भवत्येव। एवं च संसारिदशायां मुक्तदशायां चापि यत्किमपि कर्म तु जीवात्मना सम्पादयितव्यमेव। अतः स कर्मकर्तेत्युच्यते। "कर्ता विज्ञानात्मा पुरुषः" (प्र० ४।९) इति हि श्रुतिः ॥१।१।१०॥

फलभुक् ॥१।१।११॥

कृतानां कर्मणां फलमपि कर्त्रैव भोक्तव्यम् इति न्यायपतितम्। अतो जीवात्मा कर्मफलभुग्भवत्येव ॥१।१।११॥

शरीरम् ॥१।१।१२॥

जीवात्मा शरीरमपि भवति। कस्य? ब्रह्मणः। शरीरलक्षणं तूक्तम्। सापेक्षं शरीरम्। किमपेक्ष्य? ब्रह्मापेक्ष्य "यस्यात्मा शरीरम्" (बृह० ३।७।३) इति वचनात्तस्य शरीरत्वम्। जीवो ब्रह्मशरीरमत एव तस्य तच्छेषत्वमपि। शेषत्वं च पूर्वोक्तमेव ग्राह्यम् ॥१।१।१२॥

स्वयंप्रकाशश्च ॥१।१।१३॥

"अत्रायं पुरुषः स्वयंज्योतिर्भवति। कतम आत्मा। योयं विज्ञानमयः प्राणेषु हृद्यन्तर्ज्योतिः पुरुषः" इति प्रामाण्यात्तस्य स्वयंप्रकाशत्वमपि सिद्धम् ॥१।१।१३॥

ज्ञानस्वरूप इत्यनर्थान्तरम् ।१।१।१४॥

ज्ञानमेवात्र प्रकाशः। ज्ञानस्वरूप इत्यस्य प्रकाशस्वरूप इत्येवार्थः। "विज्ञानात्मा पुरुषः" इत्यत्र विज्ञानात्मकशब्दस्वारस्याद्विशेषतः सामान्यतश्च प्रपञ्चितस्य ज्ञातृत्वस्य पुनर्वचने प्रयोजनाभावाच्च ज्ञानस्वरूपत्वं सिद्धमि"ति न्यायसिद्धाञ्जनकारा आहुः ॥१।१।१४॥

ज्ञाता ॥१।१।१५॥

अहम्प्रत्ययविषय आत्मा ज्ञातापि। "विज्ञानघनः", "विज्ञानं यज्ञं तनुते", "द्रष्टा श्रोता रसयिता घ्राता मन्ता बोद्धा कर्ता विज्ञानात्मा पुरुषः" इत्यादिवचनप्रामाण्यादात्मनो ज्ञातृत्वम् ॥१।१।१५॥

अहमर्थोपि ॥१।१।१६॥

अहमर्थोप्यात्मैव। उक्तं च श्रीवेदान्ताचार्यैः--

प्रत्यक्त्वादुपलम्भतो मम सुखं भावीति मोक्षेच्छया,
मुक्तब्रह्ममुमुक्षुवेदवचसा सुप्तोहमित्युक्तितः।
मां नाज्ञासिषमित्यपि स्वपुराद्यज्ञानमात्राश्रयात्,
स्वापप्राच्यनिजक्रियास्मरणतोप्यात्माहमर्थः स्थिरः ॥

इति यामुनाचार्यैस्तु--"एवमात्मा स्वयं सिध्यन्नागमेनानुमानतः। योगाभ्यासभुवा स्पष्टं प्रत्यक्षेण प्रकाशते॥" इति योगिनामात्मप्रत्यक्षं भवतीति प्रतिपाद्यते ॥१।१।१६॥

प्रतिशरीरं भिन्नः ॥१।१।१७॥

आत्मनो नानात्वमत एव प्रतिशरीरभिन्नत्वमप्यास्थेयम्। भिन्नत्वमात्मनः स्वीकार एव कस्यचित्सुखित्वं दुःखित्वं कस्यचिदन्यालोक्यते। यद्यात्मनः प्रतिशरीरं भिन्नत्वं न स्यादेकस्मिन् शरीरे जायमानं दुःखं सुखं वा सर्वेष्वेषु शरीरेषु तस्य प्रतिभातं स्यात्। भिन्नत्वे च यस्यात्मनः कर्मानुरूपं तद्दुःखं सुखं वा स्यात् तस्यैव तत्प्रतीयते नान्यस्य। एवं चात्मनो नानात्वं नैयायिकानां सांख्यानां चाप्यभिमतमेव ॥१।१।१७॥

तदद्वैतवचनं प्रकारैक्यविषयम् ॥१।१।१८॥

यत्र क्वचिज्जीवाद्वैतवचनान्युपलभ्यन्ते तानि सर्वाणि प्रकारैक्यविषयाणि। प्रकारैक्येपि एकादिशब्दानां प्रयोगो दृश्यते। यथा अयमयं चैको व्रीहिरिति। मुक्तौ सर्वेषां जीवानां साम्यमेव। ब्रह्म वेद ब्रह्मैव भवतीत्यादावेवकार इवार्थकः। साम्ये चैव क्वचिच्छब्द

इतिनिघण्टूक्तेरिति न्यायसिद्धाञ्जने। तत्रैव 'वैष्णवं वामनमालभेत स्पर्धमानो विष्णुरेव भूत्वेमाँल्लोकानभिजयतीति साम्ये श्रौतप्रयोगदर्शनाच्च विष्णुरेव विष्णुरिवेत्यर्थः। एवं च जीवाः परमेश्वरादपि भिन्नाः परस्परं चापि। अत एव केचन मुक्ताः केचिद्बद्धा इति विभागोपपत्तिः। संसारिणोसंसारिणश्च सर्वेपि भगवच्छेषस्वरूपास्तदधीनास्तदेकरक्ष्याश्चेति। यावत्कर्मवशाज्जीवाः संसरन्ति तावदेव तेषां संसारित्वम्। छिन्ने च कर्मबन्धने सिद्धायां च भगवद्भक्तौ तत्प्राप्तौ च संसारित्वमपसार्यासंसारित्वमाद्राज्य एव सर्वेषां प्रवेशः ॥१।१।१८॥

इति प्रथमाध्याये प्रथमः पादः

अथ प्रथमाध्याये द्वितीयः पादः

नित्यबद्धमुक्तभेदाज्जीवास्त्रिविधाः ।१।२।१।

जीवानां त्रैविध्यं विशिष्टाद्वैतिनां मतम्। तत्तु साम्प्रदायिकमेव। जीवज्ञानं संकोचविकासार्हम्। येषां ज्ञानेषु न संकोचो न वा विकासस्ते नित्याः। नित्यजीवज्ञानेषु यथा नास्त्यवकाशः संकोचस्य तथैव विकासस्यापि नावकाशः। भगवत्प्राप्तिरेव ज्ञानविकासस्य परमं फलम्। भगवत्प्राप्तिरेव मुक्तिः। ततो ज्ञानसंकोच इव ज्ञानविकासोपि न भवति। ते नित्या अनन्तगरुडविष्वक्सेनादय इति केचित्। हनुमदादयस्त इत्यपि केचित्। ऐतेषां ज्ञानेषु का कीदृशी च वृद्धिरिति बहिरेव शास्त्रसमूहात्। एतेषां नित्यजीवानां शास्त्रनिर्धारिताः सन्ति केचनाधिकारविशेषाः। भगवदवतारा इवैतेषामपि स्वेच्छयैव भवन्त्यवताराः। नन्वेतदयुक्तं स्वेच्छयैव भगवदवतारा भवन्तीति। मनुशतरूपयोः पुरस्तादहमेव युष्मत्पुत्रो भूत्वा युवयोर्गृहेवतरिष्यामीति प्रतिज्ञा तु मनुशतरूपयोस्तपःफलरूपा। तत्तपःफलमनुसृत्यैव मन्ववताररूपदशरथगृहे रामावतारः। मदुक्तं नायुक्तम्। आस्तां नाम मनुशतरूपयोस्तपः। तत्फलं तु स्वेच्छयैव भगवता दत्तम्। 'यदा यदा हि धर्मस्य ग्लानिर्भवति भारत। अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम्॥' इति भगवद्गीतावाक्यमप्यस्माकमेव पक्षं साधयति। न हि भगवतः कस्यापि पारतन्त्र्यं शोभते। ननु भक्तपरन्त्रस्य भगवतः कथं पारतन्त्र्यं निषिध्यत इति चेत्, न तत्पारतन्त्र्यं तत्स्वरूपविकाराय भवति। न हि मातरि स्थितं स्वशिशोः पारतन्त्र्यं तत्स्वरूपं विकारमापादयति। न हि ततो बलीयसः कस्यापि शक्तिमतः परवत्त्वं भगवत्त्वं विनाशयितुं प्रभवति। सर्वशक्तिमान् हि भगवान् न कस्यापि परवानिति निश्चप्रचम्। गतोयं प्रासङ्गिको विचारः। उपस्थितस्तु विन्त्यते।

अनिवृत्तसंसारा बद्धाः ॥१।२।२॥

ये स्वकृतानामिष्टानिष्टकर्मणामीश्वरेच्छया फलभोगाय सकृदसकृद्बा संसरन्तीह त एवानिवृत्तसंसाराः। ॥१।२।१॥

तदतिरिक्ता मुक्ताः ॥१।२।३॥

भगवद्भक्तिसाहाय्येन संचितसदाचाराः सर्वाण्येव कृतानि कर्माणि निर्बीजानि कृत्वा भगवत्साक्षात्कारपरायणास्त एव मुक्ता उच्यन्ते ॥१।२।३।

सीता बद्धजीव इति केचित् ॥१।२।४॥

केचन संगिरन्ते भगवती सीतापि बद्धजीवकोटिमाटीकत इति ॥१।२।४॥

तन्न ॥१।२।५॥

सीतानाम्नी भगवतो नित्या शक्तिः। शक्तिशक्तिमतोरभेदात् सापि भगवत्स्वरूपैव। तथा च तस्याः परमेश्वरस्वरूपायाः श्रीभगवत्स्वरूपत्वमेव न जीवत्वं न वा बद्धजीवत्वम्। तथा चायोनिजेषु जीवेषु तस्याः परिगणनकर्तारो भ्रान्ता एव ॥१।२।५॥

तेषां द्वैविध्यम् ॥१।२।६॥

तेषां बद्धजीवानां द्वैविध्यमस्ति ॥१।२।६॥

शास्त्रवश्यत्वम् ॥१।२।७॥

बद्धेषु जीवेषु ये देवमनुष्यादयः करणवन्तस्तेषां शास्त्रवश्यत्वं भवति। शास्त्राधीना एव तेषामाचाराः। ॥१।२।७॥

नन्वाचारप्रतिपादकानि शास्त्राणि वैष्णवान्यपि सन्ति स्मार्तान्यपि। केषां शास्त्राणां वश्यत्वं देवमनुष्यादिभिराद्रियत इत्यत्राह—

उभयथा हि तद्दर्शनम् ॥१।२।८॥

बद्धेषु जीवेषु वैष्णवा अपि भवन्ति स्मार्ता अपि। शास्त्राणामप्युभये भेदाः। तथा च वैष्णवा वैष्णवशास्त्राण्याद्रियन्ते, स्मार्ताश्च स्मार्तशास्त्राणि। एवं च वैष्णवानां वैष्णवशास्त्रवश्यत्वमेव न्यायपतितम्।१।२।८।

शास्त्रवश्या द्विविधाः ॥१।२।९॥

ये हि जीवाः शास्त्रवश्या भवन्ति शास्त्राण्येवाश्रित्य सदाचारादिभिर्जीवनं यापयन्ति ते शास्त्रवश्या उच्यन्ते। ते च द्विविधा भवन्ति ॥१।२।९॥

द्वैविध्यमाह—

बुभुक्षवो मुमुक्षवश्च ॥१।२।१०॥

बुभुक्षवो धर्मार्थकामपराः। न हि कोप्येवं जीवो यः केवलमर्थकामपरत्वमेव निषेवमाणो धर्मात्पराङ्मुखत्वं सेवते। दयादानपरोपकृत्यादिषु कोपि धर्मः कमपि कथंचिदपि स्पृशत्येव। एवं च धर्मपराणां नितान्तं हानिर्न कल्पनीया। एवं च धर्मपरा अर्थपराः कामपराश्चेति बुभुक्षवः। एवं च बुभुक्षवोर्थकामपरा इति वदन्तः परास्ताः। अथवा धर्मं गौणीकृत्य ये कामार्थौ सेवन्ते ते बुभुक्षवः। धर्माचारस्य सर्वथा त्यागस्त्वशक्य एव। मुमुक्षवश्च ज्ञानपूर्वकमधर्ममनाचरन्तः शरीरनिर्वाहिकाः क्रियाः कुर्वाणाः प्राधान्येन धर्माचारपरायणाः। धर्माचारश्च सत्यभाषण–परोपकार-पाषण्डित्व-परनिन्दापरित्यागादिरूपः। भक्तिप्रपत्तिसेवनमपि धर्माचारान्तर्गतम्। तथापि तत्र इयान्विशेषः–रागद्वेषेर्ष्यामदमोहमात्सर्यादिमहादोषान्परित्यज्य ब्रह्मध्यानपरायणता भक्तिः। साङ्गशिरस्कवेदाध्ययनं तु न तत्रातीवापेक्षितम्। मनोनैर्मल्यमेव तत्र परमं कारणम्। भगवद्भक्तिर्नापेक्षते वर्णमाश्रमं वा। सर्वाधिकारा हि सा। सर्वधर्मान् सर्वाभिमानानांश्च दूरीकृत्य भगवच्चरणाश्रितः प्रपन्नः। प्रपन्नस्तु भगवच्छरणातिरिक्तं नान्यच्चिन्तयति न वाकाङ्क्षति। भक्तस्तु भक्तिबलात्किमप्यपेक्षितमभिलषत्येव। एवं च भक्तिप्रपत्त्योर्न भवति काप्यभेद्या भित्तिः ॥१०॥

फलं तु स्वसंतोषः ॥१।२।११॥

यस्य भक्तिः क्रियते यस्य वा प्रपत्तिः स्वीक्रियते तस्य न जातं दर्शनम्। केवलं शास्त्रबलादेव तं कमपि महापुरुषं नित्यं सर्वज्ञं सर्वान्तःप्रविष्टं मत्वा विश्वासपूर्वकं तस्मा आत्मसमर्पणं कुर्वाणो जनः कथं न जाड्यगर्तं पतितो मन्येत ? मन्यतां तथा, न कापि हानिः। यश्च परमेश्वरमुपास्तेदृष्टमपि श्रद्धापूर्वकं न तस्य कापि क्षतिः। परमेश्वरोपासननिबन्धनान्येव तस्य सत्यदान-प्रेम-श्रद्धादीनि तत्त्वानि सिध्यन्ति। तान्येव तस्य तारकाणि। प्रपत्तिस्तु—

आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनम्।
रक्षिष्यतीती विश्वासः षड्विधा शरणागतिः ॥
अनन्यसाध्ये स्वाभीष्टे महाविश्वासपूर्वकम्।
तदेकोपायता याच्ञा प्रपत्तिः शरणागतिः ॥इति॥

अयमेव भरन्यासः। नहि प्रपन्नानामपि कश्चन भेदः। आकिञ्चन्यानन्यगतिकत्वधर्मवान् भगवन्तमाश्रित एव प्रपन्नः। भगवन्तमाश्रितस्य लौकिकधर्मार्थकामेषु कथमपि न प्रवर्तेतेच्छा। एवं मोक्षपरत्वमेव प्रपन्नानाम्। त्रैवार्गिकपरत्वं तु तेषां स्पर्शमपि न कुर्यात्। भक्तिवत् प्रपत्तिरपि सर्वाधिकारा। भक्त्यनुष्ठाने वर्णो जातिर्वा नैव स्याद्बाधिका। भक्तौ अधीतसाङ्गसशिरस्कवेदत्वं न प्रयोजकम्। आन्तरशुद्धिः स्वकल्याणप्रवणत्वं हि तत्र हेतू। उभयत्र वेदाध्ययनमप्रयोजकम्। देवादीनां भक्तावधिकारोस्ति

न वास्तीति विचारो न वैदुष्यमावहति। देवा यदि स्वर्गीयास्तर्हि भौमानां जीवानां सदाचारैर्न तेषां प्रयोजनम्। तेषां कर्माकर्मविषये विधिनिषेधौ न वयं भूमिष्ठाः सम्पादयितुमर्हाः। तेषां षोडश संस्कारा भवन्ति न वेत्यपि भूमिष्ठैर्भूयिष्ठं न ज्ञायते। स्वर्गिणो भक्ताः प्रपन्नाश्च भवन्ति न भवन्ति वेत्यस्माकं भूमिगतानां न परिज्ञानम्। अत एव कुत्र तेषामधिकारो कुत्र नेति विचार उपरबीजवपनमेव केवलम्।

केषांचन मते दृप्त आर्तश्चेति द्वैविध्यं प्रपन्नानाम्। तदपि नोचितम्। दर्पो हि परमानर्थसम्पादकः। अतो दर्पो न प्रभवति प्रपन्नमभिभ्रष्टुम्। अवश्यमनुभोक्तव्यमिति प्रारब्धकर्मण्यनुभवन् एतद्देहावसानसमयमीक्षमाणो दृप्त इत्यादिवचनं तु प्रपत्तिमार्गानभिज्ञतापराहतानाम्। न हि भगवन्निष्ठानां भगवत्प्रपन्नानां विद्यतेवकाशो देहावसानसमयेक्षणस्य। तथाकरणस्य प्रयोजनमपि नास्ति। यदा हृदये प्रतिक्षणं भगवानेव संनिधत्ते तदा कथं स्यादवकाशो देहावसानानेहोनिरीक्षणस्य। अतो भक्तानां प्रपन्नानां स्वरूपमभिचिन्वतां सतां वैदुष्यमतां दृशि न भाति तेषां भेदभित्तिः ॥१।२।११॥

मुक्तिरप्येकैव ॥१।२।१२॥

केषांचिन्मते सालोक्यसामीप्यसारूप्यावाप्तिरपि मुक्तिरेव। तन्न। समानलोकावाप्तिरेव सालोक्यम्। समानरूपावाप्तिश्च सारूप्यम्। न स्यात्सालोक्यं मुक्तिः। धनिकगृहद्वारि स्थितानां बहूनामेव बुभुक्षितानां न भवति बुभुक्षानिरोधः। गङ्गायां सातत्येन निवसत्स्वपि मत्स्यादिषु न भवति "गङ्गा गङ्गेति यो ब्रूयाद् योजनानां शतैरपि। मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति॥" इति भावुकवचः प्रभावः। सारूप्यं तु भगवतो दुर्लभमेव जीवानाम्। अनन्तज्ञानशक्त्याद्येव भवति भगवतो रूपम्। तदानन्त्यं स्वप्नेपि दुर्लभं जीवानां भक्तानां वा प्रपन्नानां वा। यदि भगवत्स्वरूपतापत्तिर्जीवानां सुलभा तर्हि तेषां ब्रह्मत्वं सुलभतरम्। अतो मुक्तेः स्वरूपं सायुज्यमिति। सयुग्भावो हि सायुज्यम्। सयुक्शब्दश्च भिन्नयोरेकत्र साधारणयोगं दर्शयतीति न्यायसिद्धाञ्जने। ब्रह्म वेद ब्रह्मैव भवतीत्यस्यापि श्रुतिवचनस्य साम्य एव तात्पर्यम् इत्यपि तत्रैव। तादृग्गोऽहेतुश्च न निर्दिष्टा। परविद्यात्वं च ब्रह्मविषयकनिदिध्यासनस्य। किञ्चार्थं न वेदविहितभक्तित्वम् इति सिद्धान्तसिद्धा [illegible]। विद्यालक्षणे वेदविहितेतिविशेषणमसिद्धिनिरासाय। भक्तिर्हि सर्वथा भगवति स्वार्पणम्। तत्र [illegible] को नूपयोगः? ननु प्रपत्तिरपि भगवति स्वार्पणमेव। कस्तर्हि भक्तिप्रपत्त्योर्भेदः। वाढं पृच्छ। न खलु तत्तुल्यारोहो दुरूहो वा भेदः। उभयोः समानफलकत्वेपि विमानधूमयानयोः क्षिप्रप्रापकत्वाभिप्रायकत्वादिभेदवद्भेदः कल्पनीयः। भङ्गवभाक्त्वयोरनयोरिव मुक्तिरेकविधा, आत्मनः पापाभावस्वरूपत्वात्तदभावोऽविशिष्टः इत्यादि। सर्वसिद्धान्तसंग्रहेपि—"करणोपरमान्मोक्षमाहुर्वैशेषिको यथा। दुःखहानारणोपायमार्गशेषत्वकल्पकः॥" "प्रयत्नसुखदुःखेच्छाधर्माधर्मादिनाशनः। पाषाणकल्पस्तात्मात्मनो मुक्तिमिच्छति।"

वस्तुतस्तु विविधदुःखात्यन्तोच्छेद एव मोक्षशब्दार्थः। मुक्तावस्थायां किं लभ्यते किमनुभूयते किं क्रियते मुक्तैरिति विविधविचारा अत्यन्तानवद्यनर्थका एव। मुक्तैर्मुक्तिविषये किमपि नोच्यते। तद्वेत्तृविषये किमपि न तत्त्वतो विज्ञायते। शास्त्राणां कोलाहलः केषांचित्कर्णाप्यायकः केषांचिच्च कर्णपुटास्फोटकः। एवं च मुक्तावस्थायां कथं स्थेयमिति न विचारचारिमा। सावस्था प्राप्या कथं च प्राप्येतेव विचारचारुत्वम्। परिश्रमं कुर्वाणस्येह कदापि तु विश्रमः प्रत्यहमिहावलोक्यतेनयैव रीत्या जननमरणयोः प्रवाहस्यापि विश्रमो भविष्यत्येवेति धिया सद्गुरूपसदनेनासत्कर्मनिपूदनेन भवविरतिभगवद्रतितितिसम्पादनेन दुःखात्यन्तनिवृत्तिप्रेप्सया मुक्तावस्थादिदृक्षया इतः पूर्वत एव प्रस्थितमुक्तमण्डलीस्थितिपरिस्थितेव्यवस्थित्याद्यवजिगमिषया उत्कण्ठितमनसा कथंचिदिह भोगेन कर्माणि क्षपयन् भवभीतिभारं लघयन्नायूंषि समापयन् चिरप्रेप्सिताक्ष्यानन्दमहाम्भोधितरलतरङ्गैः शीतलितशरीरवभूपया अनवधिकानन्दानुवभूपया च चिरपरिचितमपि शरीरमनायासेनैव परित्यज्य मातापितृसहोदरादिवियोगदरं सहसैव दारयित्वा परलोकं प्रयाति जीवगणः। ततश्च कस्यापि पुनरागतिमिहानवलोकयन्निहस्थो जीवगणस्तस्या एवावस्थायै प्रत्यहं स्पृहयति। एषा मुक्तिकथा। मुक्ता यत्र

जिगमिषन्ति तत्र प्रयान्ति यच्चिकीर्षन्ति तत्कुर्वन्ति यदभिलषन्ति तदधिगच्छन्तीतिप्रलोभनवचनानि मुक्ति मुक्तिमर्यादां च निराद्रियन्त एवेति मतमस्माकं मुक्ति-वैविध्यवृद्धिभृताम्। सन्त्येव कर्माणि निषेवितव्यानि सन्त एवाचारा आचरणीया सन्त एव विचारा विचारणीया सुकृतिरादरणीया विकृतिनिरादरणीया द्वेषो द्वेष्यो भविकः काम्योकाम्यः सेव्य एव विरोधः क्रोधस्य, नानुरञ्जयितव्यः कामो, न लिप्स्यो लोभः, खण्डशः खण्डयितव्यः पाषण्डः, सत्यं जिघृक्षितव्यमसत्यं जिहासितव्यं मदो दमनीयः सत्यस्वरूपं ब्रह्मोपासनीयम्। ततश्च नियतं ब्रह्मादर्शनं जीवायत्तं भविष्यतीति निश्चप्रचम् ॥१।२।१२॥

देहादिविलक्षणः ॥१।२।१३॥

ननु देह एवात्मा। अहं स्थूलः, अहं कृशः, अहं रुग्णः, अहं नीरोग इति व्यवहारदर्शनात्। स्थूलत्वं कृशत्वं रुग्णत्वं नीरोगत्वमित्येतेषां व्यवहाराणां देह एव शक्यत्वात्। बाढम्। न देहादीनामात्मत्वम्। देहस्त्वनेकावयवसङ्घातरूपः। सर्वेष्वेवावयवेषु देहत्वं निर्बाधम्। यदि देह एवात्मा चैतन्यरूपस्तर्हि सर्वेषामवयवानामपि चेतनत्वमात्मत्वं च स्यात्। एवं चात्मबहुत्वं स्यात्। तच्च श्रुतिविरुद्धम्। एकस्मिन्देह एकस्यैवात्मनः स्थितिर्न बहूनामिति वैदिकी मर्यादा। ननु बहुत्वमात्मनो न वेदमर्यादामाक्राम्यति। वेदेषु सर्वत्रात्मबहुत्वस्यैव प्रतिपादनात्। तथाहि "अग्ने नय सुपथा राये अस्मानिति, यद्भद्रं तन्न आसुव इति, धियो यो नः प्रचोदयादिति च। एवं बहूनि वैदिकवाक्यानि प्रतिपादयन्ति बहुत्वमात्मनो दृश्यन्ते वेदेषु। नैतत्। वेदा ह्यपौरुषेया इत्यास्तिकसिद्धान्तः। ते च पारमेश्वरं ज्ञानम्। पारमेश्वरे ज्ञाने पुत्रभूताः सर्व एवात्मानः सर्वदोपस्थिताः। तानेवोद्दिश्य बहुवचनम्। नान्यथा। अत एव बहुषु मन्त्रेष्वेकवचनमपि दृश्यते। तथा हि–"न हि ते शूर राधसोऽन्तं विन्दामि सत्रा" (ऋ० ८।४६।४१)। इति। 'जिगात्विन्द्र ते मनः" (ऋ० ८।४५।३२)। "मा न एकस्मिन्ननागसि मा द्वयोरुत त्रिषु। वधीर्मा शूर भूरिषु।" (ऋ० ८।४५।३४)। "तस्मादहमूतीषहः।" (ऋ० ८।४५।३५) "यो म इमं चिदुत्मनामन्दच्चित्रं दावने" (ऋ० ८।४६।२७) इत्यादिषु। देहादीनां जडत्वादपि न तत्र चैतन्यचिन्ताचातुर्यमावहति ॥१।२।१३॥

न प्रत्येकमिन्द्रियमात्मा ॥१।२।१४॥

यदि प्रत्येकमिन्द्रियस्यात्मत्वं स्वीक्रियेत, एकस्मिन्नेव शरीरे बहूनामात्मनां समवायः स्यात्। तथा च सर्वव्यवहारासिद्धिरेव स्यात्। परस्परं कलहोपि स्यात्। "योहं बाल्ये भवं स एवाहमिदानीं यौवनेस्मि" "यदेवाहमपश्यं तदेवाहं स्पृशामि" इति प्रत्यभिज्ञापि न स्यात्। अतो न प्रत्येकमिन्द्रियमात्मा। यदि चक्षुरात्मा, तर्हि कोपि चक्षुष्मान् स्वदृष्टं पदार्थं न स्मरेदन्धो भवन्। यदि श्रोत्रमात्मा तर्हि बहु शृण्वन्नपि पूर्वं कोपि बधिरो भवन् शब्दं न स्मरेत्। यदि त्वगात्मा तर्हि दूत्याहतो न कोपि स्पर्शं स्मरेत्। स एवायं गन्ध इति गन्धज्ञानमपि न स्याद्घ्राणेन्द्रियोपघाते सति। अन्तःकरणमपि नात्मा। मनसा जानाति बुद्ध्या विचार्य वदतीत्यादि व्यवहारैस्तस्य कारणत्वमेव न कर्तृत्वम्। "मन एव मनुष्याणां करणं बन्धमोक्षयोः"इत्यत्र कारणत्वं करणत्वं वा मनसः प्रसिद्धं न कर्तृत्वम्। ननु "यज्जाग्रतो दूरमुपैति दिव्यं····तन्मे मनः शिवसंकल्पमस्तु" इत्यादिषु याजुषमन्त्रेषु मन.शब्दो नान्तःकरणगतमनोबोधकं किन्तु मनुते बुध्यत इति व्युत्पत्त्या तस्याप्यात्मवाचकत्वमेवेति मत्कृतयजुर्वेदसंस्कारभाष्ये स्पष्टम् ॥१।२।१४॥

तथैव प्राणाः ॥१।२।१५॥

प्राणानामप्यात्मत्वं न। कुतः ? बहुत्वदर्शनात्। प्राणाः सन्तीतिप्रयोगस्य बाहुल्यात्। नैकस्मिन्नेव शरीरे बहूनामात्मनामवस्थितिः। सत्यां च तस्यां सर्वव्यवहारोपरोधः स्यात्। "निरस्तो देहचैतन्यप्रतिषेधप्रकारतः। प्राणात्मवादो न पृथक् प्रयोजयति दूषणम्॥" इत्यभियुक्तोक्तेः ॥१।२।१५॥

न ज्ञानम् ॥१।२।१६॥

ज्ञानमपि नात्मा। मम ज्ञानं जातम् मम च विनष्टमिति प्रात्यूहिकव्यवहारदर्शनात्। धर्मभूतज्ञानमपि नात्मा। तस्यात्मनो धर्मभूतत्वात्। अतस्थिर एव कश्चनात्मा सर्वैरेव स्वीकर्तव्यः। निर्विषयाया निराश्रयायाः संविदोसंभवादेव न तस्याप्यात्मत्वम्। मुक्तिदशायामहमर्था-

भावान्न तदानीमात्मावस्थितिरिति तु न वक्तव्यम्। आत्मनाशस्य प्रसङ्गात्। तथा च को हि विद्वान् आत्मनाशाय व्रतैर्महाव्रतैरात्मानं ज्वरयेत् जरयेच्च। अतो ज्ञानमपि नात्मा ॥१।२।१६॥

नाहमर्थोहङ्कारः ॥१।२।१७॥

अहमर्थस्याहङ्कारत्वाद् अहङ्कारस्य च शास्त्रेषु हेयत्वप्रतिपादनात् अहमर्थो हेयतां व्रजेदिति तु न। गर्वार्थकाहङ्कारस्यैव शास्त्रेषु हेयत्वं नाहमर्थाहङ्कारस्य। अहमर्थस्तु आत्मैव। आत्मा तु पूर्वोक्तदिशा देहादिविलक्षणः "न जायते म्रियते वा विपश्चित्" (कठ० १।२।१८) "ज्ञाज्ञौ द्वा अजावीशानीशौ" (श्वे० १।८) "अजो नित्यः शाश्वतोयं पुराणः" (कठ० १।२।१८) "नित्यो नित्यानाम् (कठ० २।५।१३) इत्यादिश्रुतीनां प्रामाण्येनात्मन उत्पत्तिविनाशशून्यत्वमेव ॥१।२।१७॥

तस्मान्नोपचयापचयौ ॥१।२।१८॥

यत आत्मा नित्यस्तत एव न तत्रोपचयापचयौ। ननूपचयापचयौ देह एव भवतः। देहाभावात्तस्य को नाम विचारावसरस्तस्योपचयापचययोरिति। उच्यते। न हि देह एवोपचयापचयवानिति राजाज्ञा। ज्ञानेपि भवत्येवोपचयोपचयश्चेति। एवं चात्मज्ञानेपि नोपचयापचयौ। शरीर्यवस्थायां ज्ञानोपचयापचयौ तु कर्मसहकृतशरीरस्वामिनस्तस्य। शरीरसम्बन्धेनैव तस्यात्मनो ज्ञानमालिन्यमित्यवधेयम्। स्थूलोहं कृशोहमिति धीधारा तु देहात्मभ्रमादिति मन्तव्यम्। जीवस्वरूपं न जडम्। प्रत्युत "हृद्यन्तर्ज्योतिः पुरुषः" "अत्रायं पुरुषः स्वयंज्योतिर्भवति" "विज्ञानघनः" इति श्रुतिवचनसमवायादजडमेव। शरीराच्छरीरान्तरमतति गच्छतीति लोकाल्लोकान्तरमतति गच्छतीति वात्मेतिव्युत्पत्तिबलादपि तस्य न जडत्वम्। सुखमहमस्वाप्सम् इति सुप्तोत्थितस्य प्रत्यवमर्शात्सुषुप्तावपि तस्य ज्ञानं वर्तत एवेति निश्चेयम्। ननु सुखमहमस्वाप्सं न किमप्यज्ञासिषमित्यपि तस्य सुषुप्तिज्ञानप्रकारः। तत्र नाज्ञासिषमिति प्रतीत्या सुषुप्तौ तस्य ज्ञानविरह एव निश्चीयत इति नावधेयम्। मद्व्यतिरिक्तं किमपि नाज्ञासिषमित्येव तदर्थस्य सर्वैरेव स्वीक्रियमाणत्वात्। न च मम शरीरस्यापि ज्ञानं नासीत्तथास्वाप्समित्याकारकज्ञानस्यापि तदानीं संभवात्कथं तस्य ज्ञानवत्त्वमिति वाच्यम्। शरीरज्ञानं त्विन्द्रियाधीनम्। इन्द्रियाणां स्वापकाले निर्व्यापारात् न भवति शरीरज्ञानम्। सुखस्य तु तस्य सुखरूपत्वानदानीमपि प्रतीतत्वात्। यदि ज्ञानं नित्यमजडं चेति तदा सुषुप्तावपि कुतो न तस्य भानमिति चेत् तदानीमभानं प्रसरणाभावात्। इन्द्रियद्वारा हि तत्प्रसरणम्। स्वापदशायामिन्द्रियाणां च निर्व्यापारतया प्रसरणस्याशक्यत्वात्तज्ज्ञानस्याप्यप्रसरणात्। आत्मन आनन्दरूपतापि विज्ञेया। क्वचिदानुकूल्यस्याप्रतीतेर्दुःखावगतिस्तस्य चेत् न सा तस्यानन्दरूपताया हानये भवति। किंच दुःखावगतिः कर्मक्लेशताडितस्य निर्बलस्यात्मन एव भवति न सर्वेषाम्। अतर्कितानेकसङ्कटानि सहमानस्यापि प्रह्लादस्य सबलात्मनो दुःखित्वस्याप्रत्यक्षितत्वात् ॥१।२।१८॥

आत्मदेति नानित्यत्वाय ॥१।२।१९॥

"य आत्मदा बलदा" इत्यृचा नात्मनोनित्यत्वमवगन्तव्यम्। आत्मशब्दस्तत्र मनोवाचकः। आत्मानं मनो ददातीति आत्मदा। परमेश्वरस्य विशेषणमेतत्। परमेश्वरो जीवेभ्यः प्रबलं मनो ददातीत्यतस्तस्यात्मदत्वम्। अन्यथात्मनोनित्यत्वमेव स्यात्। दानं तु प्रवर्तनम्। आत्मदेत्यस्यात्मप्रवर्तक इत्यर्थः स्यात्। स तु नास्माकं सम्मतः। आत्मानित्यत्वे सर्वकर्मविपर्ययः सर्वकर्मसाङ्कर्यं च स्यात्। फलानुपलब्धिरपि। तथा कृतविप्रणाशः सम्पद्येत। अकृताभ्यागमोपि स्यात्। येन कर्म कृतं सोनुपलब्धफलः स्याद्येन च तन्न कृतं स उपलब्धफलः स्यात्। अतो नित्य एवात्मेति ॥१।२।१९॥

इति विशिष्टाद्वैतदर्शने प्रथमाध्याये द्वितीयः पादः
॥ प्रथमाध्यायः समाप्तः ॥

अथ द्वितीयेऽध्याये प्रथमः पादः



अथाचित् ॥२।१।१॥

अथ प्रथमाध्याये चिन्निरूपणं कृत्वेह द्वितीयेस्मिन्नध्याये क्रमप्राप्ताचिन्निरूपणं क्रियते ॥२।१।१॥

अचिदेव प्रकृतिः ॥२।१।२॥

अचिदेव प्रकृतिशब्देनोच्यते। न चिनोति किमपि स्वातन्त्र्येणेति अचित्। अचित् प्रकृतिश्च समानार्थकौ शब्दौ ॥२।१।२॥

सत्त्वरजस्तमोरूपगुणाश्रयः सा ॥२।१।३॥

प्रकृतेः स्वरूपमाह सत्त्वरज इति। सत्त्वरजस्तमसां सात्त्विकराजसतामसगुणानां य आश्रयः सैव प्रकृतिः। सैव चाचित्। अस्या एव बद्धचेतनानां ज्ञानानन्दयोस्तिरोधायकत्वं विपरीतज्ञानजनकत्वं च। इयमेवेश्वरस्य क्रीडासाधनभूता। तत्र सत्त्वस्य ज्ञानसुखादिजनकत्वम्। सत्त्वात्संजायते ज्ञानमितिभगवताप्युक्तम्। रजसो रागतृष्णयोः कर्मसङ्गस्य च जनकत्वम्। तमसश्च विपरीतज्ञानानवधानालस्यनिद्रादीनां जनकत्वम् ॥२।१।३॥

सा च नित्या ॥२।१।४॥

सा प्रकृतिर्नित्या। नित्यत्वं चोत्पत्तिनाशरहितत्वम् ॥२।१।४॥

अक्षराविद्यामायाशब्दवाच्यापि ॥२।१।५॥

सा अक्षरशब्दवाच्या नित्यत्वात्। अविद्याशब्दवाच्या ज्ञानविरोधित्वात्। मायाशब्दवाच्या च विचित्रसृष्टिकारणत्वात् ॥२।१।५॥

कार्योन्मुखावस्थाऽव्यक्तम् ॥२।१।६॥

सोकामयत वहु स्यां प्रजायेयेति भगवत्सङ्कल्पाधीनगुणवैषम्यात्कार्योन्मुखावस्था साव्यक्तमित्युच्यते ॥२।१।६॥

अव्यक्तान्महान् ॥२।१।७॥

अव्यक्तान्महान् महत्तत्त्वं जायते। अव्यक्तावस्थाऽव्यवहितोत्तरावस्थाविशिष्टमहङ्कारावस्थाव्यवहितपूर्वावस्थाविशिष्टं द्रव्यं महानित्युच्यत इतितत्त्वम्। विषमविकारेषु प्रथमविकारो महान्। अयं च महानात्मनो जीवस्य मनस्यध्यवसायं जनयति। अस्य च महतो गुणवैषम्येण सात्त्विको राजसस्तामसश्चेति त्रिविधो भेदो भवति। एतस्मादुत्पन्नेषु विकारेषु प्रथमविकारविशेषस्त्वहंकारः पूर्वोक्त आत्मनो मनसि देहविषयामहंबुद्धिमुत्पादयति। स्वयं तत्सहाकारित्वादहङ्कार इत्यभिधीयते। उपर्युक्ताहङ्कारभेदेषु सात्त्विकाहङ्कारो वैकारिको राजसाहङ्कारस्तैजसस्तामसाहङ्कारो भूतादिरितिविभागः ॥२।१।७॥

अहङ्कारादिन्द्रियाणि ॥२।१।८॥

अहङ्कारादित्यस्य सात्त्विकाहङ्कारादित्यर्थः। तस्मादिन्द्रियाणि जायन्ते ॥२।१।८॥

तान्येकादश ॥२।१।९॥

सात्त्विकाहङ्कारादुत्पन्नानीन्द्रियाण्येकादश भवन्ति। तेषु पञ्च ज्ञानेन्द्रियाणि पञ्च कर्मेन्द्रियाणि मनश्चैकम् ॥२।१।९॥

मनो बुद्ध्यहङ्कारचित्तशब्दैरप्यभिधीयते ॥२।१।१०॥

इदं च बुद्ध्याद्यभिधानमध्यवसायाभिमानचिन्तारूपपुरुषबुद्धिविशेषकारणदशायामेव ॥२।१।१०॥

मन एव बन्धकारणम् ॥२।१।११॥

शब्दादिविषयसंगावस्थायामेव मनसो बन्धकारणत्वम् ॥२।१।११॥

तच्चैकमेव ॥२।१।१२॥

तन्मनः प्रत्येकं शरीरे प्रत्येकं जीवस्य साधनभूतमेकमेव ॥२।१।१२॥

मोक्षकारणम् ॥२।१।१३॥

तच्च मन एव मोक्षकारणम्। मोक्षकारणीभूतस्य मनसोतीव पावित्र्यमपेक्ष्यते। मन एव मनुष्याणां कारणं बन्धमोक्षयोरिति भगवताप्युक्तम् ॥२।१।१३॥

स्मृत्यादिकरणं च ॥२।१।१४॥

स्मृत्यादीनां तदेव करणमपि भवति। तस्य कर्मेन्द्रियत्वं तु न। ज्ञानद्वारैव कर्महेतुत्वात् ॥२।१।१४॥

हृदयप्रदेशवृत्ति ॥२।१।१५॥

हृदयप्रदेशे तस्य मनसो वृत्तित्वम् ॥२।१।१५॥

इन्द्रियाणि द्विविधानि। ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि च। तत्र ज्ञानेन्द्रियाणि लक्षयति—

श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मकानि ज्ञानेन्द्रियाणि ॥२।१।१६॥

शब्दमात्रग्रहणशक्तमिन्द्रियं श्रोत्रम् ॥२।१।१७॥

तन्मनुष्यादीनां कर्णशष्कुल्यवच्छिन्नप्रदेशवृत्ति। द्विजिह्वानां च नयनवृत्ति ॥२।१।१७॥

स्पर्शमात्रग्रहणशक्तं त्वगिन्द्रियं सर्वशरीरवृत्ति ॥२।१।१८॥

स्पष्टम् ॥२।१।१८॥

ननु यदि सर्वशरीरवृत्ति त्वगिन्द्रियं कथं न तर्हि नखदन्तकेशादिषु स्पर्शोपलम्भ इत्याशङ्क्याह—

नखदन्तकेशादिषु प्राणमान्द्यतारतम्यात् स्पर्शानुपलम्भः ॥२।१।१९॥

ननु नखदन्तकेशाद्या अपि शरीरान्तरभूता एव। कथं न तत्र स्पर्शोपलम्भो भवतीत्याह प्राणमान्द्यतारतम्यादिति। किं च तेषु सर्वथा स्पर्शानुपलम्भ इति तु नैव मन्तव्यम्। दन्ताः स्पर्शं कुर्वन्त्येव, स्पर्शोपलम्भोपि भवत्येव। अपृथग्भूतेषु नखेष्वपि स्पर्शानुभवः। केशेषु तु अतिमन्दानुभूतिस्तस्य। एवं च स्पर्शानुपलम्भ इत्यस्य स्पष्टतरस्पर्शानुपलम्भ इत्यर्थो विज्ञेयः ॥२।१।१९॥

रूपमात्रग्रहणशक्तं चक्षुः नयनवृत्ति ॥२।१।२०॥

इन्द्रियमिति सर्वत्रानुवध्यते। चक्षुरिन्द्रियं रूपमात्रग्रहणे शक्तिमत्। तच्च नयनवृत्ति ॥२।१।२०॥

रसमात्रग्रहणशक्तं रसनेन्द्रियं जिह्वाग्रवृत्ति ॥२।१।२१॥

स्पष्टम् ॥२।१।२१॥

गन्धमात्रग्रहणशक्तं घ्राण नासाग्रवृत्ति ॥२।१।२२॥

स्पष्टम् ॥२।१।२२॥

अथ कर्मेन्द्रियाणि ॥२।१।२३॥

उक्तानि ज्ञानेन्द्रियाणि। अतः परं कर्मेन्द्रियाण्युच्यन्त इति शेषः ॥२।१।२३॥

वाक्पाणिपादपायूपस्थास्यानि ॥२।१।२४॥

वाक् पाणिः पादः पायूपस्थं चेति तेषां नामानि ॥२।१।२४॥

वर्णोच्चारणकरणमिन्द्रियं वाक् ॥२।१।२५॥

स्पष्टम् ॥२।१।२५॥

आदानप्रदानसमर्थमिन्द्रियं पाणिः ॥२।१।२६॥

आदानं ग्रहणम्। प्रदानमन्यस्मा अर्पणम् ॥२।१।२६॥

सञ्चरणकरणमिन्द्रियं पादः ॥२।१।२७॥

मनुष्यपशुपक्षिणां चरणवृत्ति। भुजगादिसरीसृपाणां चोरोवृत्ति ॥२।१।२७॥

मलत्यागकरणमिन्द्रियं पायुः ॥२।१।२८॥

मान्थालादीनां मुखादिवृत्ति। मनुष्यपशुपक्ष्यादीनां च नितम्बमध्यवृत्ति ॥२।१।२८॥

आनन्दविशेषकरणमिन्द्रियमुपस्थः ॥२।१।२९॥

तच्च मेहनादिवृत्ति ॥२।१।२९॥

अणुपरिमाणानि ॥२।१।३०॥

एतानीन्द्रियाण्यणूनि। अणुत्वं परिमाणविशेषः। स च परमाणौ द्व्यणुके च तिष्ठति ॥२।१।३०॥

शरीरनाशान्नाशः ॥२।१।३१॥

इन्द्रियाणां मनसश्चापि शरीराङ्गत्वाद्भौतिकत्वाच्छरीरनाशान्नाश इति तत्त्वज्ञाः। परकायप्रवेशादिकं तु प्रवादमात्रम्। परकायं प्रविष्टे जीव इन्द्रियाण्यपि परकायमेव प्रविशन्ति। मनोपि परकीयं तत्रैव। तत्र प्रविश्य कुत्र तिष्ठन्त्येते किं च कुर्वन्तीति सर्वं परमेश्वरेणैव विज्ञेयम्। यदि तत्तदिन्द्रियेषु तत्तदिन्द्रियाणि प्रविशन्ति तर्हि यस्मिञ्शरीरे तेषां प्रवेशस्तत्र चक्षुश्चतुष्टयं श्रोत्रचतुष्टयमित्यादि विज्ञेयम्। प्रयोजनं तु परमात्मैव विजानाति। न तत्र गतिर्मानवानाम्। शरीरनाशात्तेषामपि नाश इत्येव पक्षः श्रेयान् ॥२।१।३१॥

इति द्वितीयेध्याये प्रथमः पादः

●

अथ द्वितीयेध्याये द्वितीयः पादः

भूतानामव्यवहितसूक्ष्मावस्थाविशिष्टं द्रव्यं तन्मात्रमेव भूतोपादानम् ॥२।२।१॥

दधिरूपेण परिणममानस्य पयसो मध्यमावस्थावद्भूतरूपेण परिणममानस्य द्रव्यस्य ततः पूर्वा या काचिदवस्था तद्विशिष्टं द्रव्यं तन्मात्रमुच्यते। तदेव पञ्चानां भूतानामुपादानम् ॥२।२।१॥

विशिष्टशब्दादिविषयाधिकरणं भूतम् ॥२।२।२॥

स्पष्टम् ॥२।२।२॥

शब्दतन्मात्रं स्पर्शतन्मात्रं रूपतन्मात्रं रसतन्मात्रं गन्धतन्मात्रं चेति तन्मात्राणि पञ्च ॥२।२।३॥

तामसाहङ्काराकाशयोर्मध्यमावस्थाविशिष्टं द्रव्यं शब्दतन्मात्रम्। आकाशवाय्वोर्मध्यमावस्थाविशिष्टं द्रव्यं स्पर्शतन्मात्रम्। वायुतेजसोर्मध्यमावस्थाविशिष्टं द्रव्यं रूपतन्मात्रम्। तेजःसलिलयोर्मध्यमावस्थाविशिष्टं द्रव्यं रसतन्मात्रम्। आपृथिव्योर्मध्यमावस्थाविशिष्टं द्रव्यं गन्धतन्मात्रमिति तदेव सूत्रैराहाग्रे ॥२।२।३॥

तामसाहङ्काराकाशयोर्मध्यमावस्थाविशिष्टं द्रव्यं शब्दतन्मात्रम् ॥२।२।४॥

स्पष्टम् ॥२।२।४॥

तस्मादाकाशः ॥२।२।५॥

तस्माच्छब्दतन्मात्रादाकाशो जायते। स चास्पर्शवान् विशिष्टशब्दाधारः श्रोत्राप्यायिता चेति। स च प्रत्यक्षः। नीलं नभ इति प्रतीतेः। पञ्चीकरणप्रक्रियया रूपवांश्च। तस्माद्वा एतस्मादात्मन आकाशः संभूत इति श्रुतेरुत्पत्तिमत्त्वादनित्यश्च ॥२।२।५॥

शब्दो गुणः ॥२।२।६॥

आकाशस्य गुणः शब्द इति ॥२।२।६॥

आकाशवाय्वोर्मध्यमावस्थाविशिष्टं द्रव्यं स्पर्शतन्मात्रम् ॥२।२।७॥

स्पष्टम् ॥२।२।७॥

तस्माद्वायुः ॥२।२।८॥

तस्मात्स्पर्शतन्मात्राद्वायुरुत्पद्यते। अनुष्णाशीतविशिष्टस्पर्शवान् गन्धवांश्च सः। तस्मिन्नेव नानासलिलातपकुसुममाद्यवयवयोगाच्छीतोष्णसौरभादिप्रतीतिः ॥२।२।८॥

गुणौ शब्दस्पर्शौ ॥२।२।९॥

शब्दस्पर्शौ वायोर्गुणाविति। विशिष्टस्पर्शवत्त्वं रूपशून्यत्वं च तल्लक्षणम् ॥२।२।९॥

त्वगिन्द्रियाप्यायकः ॥२।२।१०॥

त्वगिन्द्रियग्राह्यत्वात्त्वगिन्द्रियाप्यायकत्वं तस्य ॥२।२।१०॥

तस्य पञ्च प्रकारा इत्याह—

शरीरधारणादिहेतुर्वायुविशेषः प्राणः ॥२।२।११॥

प्राणेषु सत्स्वेव शरीरधारणसंवर्धनादिकं स्यात् नान्यथेति ॥२।२।११॥

तस्य स्थानमाह—

हृदि ॥२।२।१२॥

हृदि हृत्प्रदेशे प्राणवायोः स्थानम् ॥२।२।१२॥

स पञ्चधा ॥२।२।१३॥

स प्राणः पञ्चधा पञ्चप्रकारः प्राणापानादिभेदेन ॥२।२।१३॥

गुदेऽपानः ॥२।२।१४॥

मलादिनिस्सारणहेतुरपानवायुः। स्थानं तु तस्य गुदम्। "अधो नयत्यपानं तु आहारं च नृणामधः। मूलशुक्रवहो वायुरपान इति कथ्यते" २॥२।१४॥

सर्वशरीरगो व्यानः ॥२।२।१५॥

सर्वशरीरव्यापकः प्राणान्तर्गतो वायुविशेषोव्यानः। ॥२।२।१५॥

कण्ठ उदानः ॥२।२।१६॥

अन्नादेरूर्ध्वनयनादुदानः। स्थानं तस्य कण्ठः।

स्पन्दयत्यधरं वक्त्रं गात्रनेत्रप्रकोपनः।
उद्वेजयति मर्माणि उदानो नाम मारुतः॥
विद्युत्पावकवर्णः स्यादुत्थानासनकारकः।
पादयोर्हस्तयोश्चापि सर्वसन्धिषु वर्तते ॥२।२।१६॥

नाभिदेशे समानः ॥२।२।१७॥

आहारेषु पाकार्थं वह्नेः समाननयनात्समानः। भुक्तपरिणामाय जठरानलस्य समुन्नयनात्समानः इति वा ॥२।२।१७॥

स च स्पर्शनप्रत्यक्षः ॥२।२।१८॥

स्पर्शेण वायोः प्रत्यक्षं भवति। स्पर्शनप्रत्यक्षे रूपवत्त्वस्याप्रयोजकत्वम्। वायोस्तिर्यक्प्रसरणं स्वारसिकम्। पार्थिवादिद्रव्येण वाय्वन्तरेण वा अभिघातवशाद् भ्रमणोर्ध्वगमनादयः। ते च दूरस्थैः तृणरज्जुप्रभृतीनां भ्रमणोर्ध्वगमनादिभिरनुमेयाः। तत्रत्यैस्तु स्पर्शनग्राह्याः ॥२।२।१८॥

वायुतेजसोर्मध्यमावस्थाविशिष्टं द्रव्यं रूपतन्मात्रम् ॥२।२।१९॥

स्पष्टम् ॥२।२।१९॥

तस्मात्तेजः ॥२।२।२०॥

रूपतन्मात्रात्तेज उत्पद्यते। वायोरग्निरित्यग्निशब्दस्तेजोमात्रपरः। उष्णस्पर्शवत्त्वभास्वररूपत्वादिकं तेजो लक्षणम्। रक्तभास्वरमेव रूपम्। रूपान्तरोपलम्भस्तु पृथिवीजलांशसंसर्गवशादितिसिद्धान्तसिद्धाञ्जने। तस्यान्तःक्रिया बहिष्क्रिया च। वैश्वानरसंज्ञकजाठराग्निरूपेणान्तःक्रिया। अग्निमूर्यात्मना पचनादिर्बहिःक्रिया ॥२।२।२०॥

तच्चतुर्धा भौमदिव्यौदर्याकरजभेदात् ॥२।२।२१॥

स्पष्टम् ॥२।२।२१॥

पार्थिवमात्रेन्धनं भौमम् ॥२।२।२२॥

भौमं विवृणोति पार्थिवेति। यथा दीपादि ॥२।२।२२॥

जलमात्रेन्धनं दिव्यम् ॥२।२।२३॥

यथा सूर्यादि ॥२।२।२३॥

पार्थिवजलेन्धनमौदर्यम् ॥२।२।२४॥

यथा जाठरम् ॥२।२।२४॥

निरिन्धनमाकरजम् ॥२।२।२५॥

यथा सुवर्णादि। सुवर्णस्योष्णस्पर्शप्रतीतिर्न भवति। तत्र द्रव्यान्तरसंसर्गः कारणम् ॥२।२।२५॥

सामान्येन प्रभा प्रभावांश्च ॥२।२।२६॥

स्वापृथक्सिद्धत्व—स्वाधिकपरिमाणवत्वोभयसम्बन्धेन तेजोविशिष्टं तेजः प्रभा। प्रभाप्यग्निः प्रभावानपि तथा। प्रभाविशिष्टं तेजः प्रभावात्। आवरणसदसद्भावाधीनसंकोचविकासा प्रसारिततेजोविशेषः प्रभा। सा च प्रभावद्भिः सहोत्पद्यते, सह नश्यतीति यतीन्द्रमतदीपिका ॥२।२।२६॥

द्रव्यरूपा ॥२।२।२७॥

सा प्रभा द्रव्यरूपा। रूपवत्वात्। स्वाश्रयभूतादीपादन्यत्र तत्समीपे देशे तस्या विद्यमानत्वात् ॥२२।२७॥

गुणत्वं तस्या न व्यपोह्यत इत्याह—

गुणसूत्रापि ॥२।२।२८॥

तस्या गुणत्वं तु न व्यपोह्यते । आश्रयापेक्षित्वात् ॥२।२।२८॥

सावयवा च ॥२।२।२९॥

स्पष्टम् ॥२।२।२९॥

न सुवर्णमिति केचित् ॥२।२।३०॥

तेज इति प्रकृतम् । सुवर्ण तु न तैजसम् । पार्थिवमेव । पीतरूपवत्वाद् गुरुत्ववत्त्वाच्च । काठिन्यवत्त्वादपि । काठिन्यं तु पृथिव्या एवेति सिद्धान्तसिद्धाञ्जनकाराः । ॥२।२।३०॥

तत्तेजः शब्दस्पर्शरूपगुणवच्च ॥२।२।३१॥

तस्मिंस्तेजसि शब्दस्पर्शरूपाख्या गुणाः सन्ति । रसशून्यत्वे सति रूपवत्वं च तल्लक्षणम् ॥२।२।३१॥

तेजःसलिलयोर्मध्यमावस्थाविशिष्टं द्रव्यं रसतन्मात्रम् ॥२।२।३२॥

स्पष्टम् ॥२।२।३२॥

तस्मादापः ॥२।२।३३॥

तस्माद्रसतन्मात्रादापो जायन्ते । शीतस्पर्शवत्त्वं चापां लक्षणम् ॥२।२।३३॥

अप्पृथिव्योर्मध्यमावस्थाविशिष्टं द्रव्यं गन्धतन्मात्रम् ॥२।२।३४॥

स्पष्टम् ॥२।२।३४॥

तस्मात्पृथिवी ॥२।२।३५॥

तस्माद्गन्धतन्मात्रात् पृथिवी जायते । गन्धवत्त्वं तस्या लक्षणम् । तस्या कृष्णरूपं स्वाभाविकम् । पाकवशाच्च रूपान्तरोत्पत्तिः । रसवत्त्वे सति अनुष्णाशीतस्पर्शवत्त्वं पाकजरूपवत्त्वमित्याद्यपि तल्लक्षणम् ॥२।२।३५॥

मृत्पाषाणान्नौषधादिबहुप्रकारा सा ॥२।२।३६॥

स्पष्टम् ॥२।२।३६॥

आप्यायकशरीरविषयभेदात्सा त्रिधा ॥२।२।३७॥

पृथिवीभागा आप्यायकाः । ते च मनो घ्राणं चाप्याययन्ति । अस्मदादिशरीरं पार्थिवम् । मृत्पाषाणादिर्विषयः ॥२।२।३७॥

तमः ॥२।२।३८॥

तमोपि पृथिवी । अत एव द्रव्यम् । संकोचविकासरूपावस्थावत्त्वात् क्रियावत्वाच्च । पार्थिवं चाबाधितनीलादिप्रत्ययविषयत्वात् । न च तमसः पार्थिवत्वे पृथिवीतः पृथगेव "तमः ससर्ज भगवान्" इति सृष्ट्यभिधानानुपपत्तिरिति वाच्यम् । पृथक्सृष्टिवचनस्य स्वर्गान्तरिक्षसृष्ट्यादिवदुपपत्तेः । न च तमसो द्रव्यत्वे तमः संयुक्तस्य तमसश्चाक्षुषत्वानुपपत्तिः, द्रव्यनिष्ठलौकिकविषयतासम्बन्धेन चाक्षुषं प्रति संयोगेन तमसः प्रतिबन्धकत्वादिति वाच्यम् । तमोभिन्नद्रव्यनिष्ठविषयतासम्बन्धेन चाक्षुषं प्रत्येव तत्प्रतिबन्धकत्वत्वीकारात् इति सिद्धान्तसिद्धाञ्जनम् ॥२।३।३८॥

तद्गुणत्वात्तदवस्थान्तरत्वाद्वा ॥२।२।३९॥

अबाधितनीलादिप्रत्ययविषयत्वेन तमो द्रव्यमपि पार्थिवमपि । न च रूपिप्रत्यक्षे आलोकसहकृतचक्षुषः कारणत्वदर्शनात्तमःप्रत्यक्षे च तदभावान्न तमसो रूपिद्रव्यत्वमितिवाच्यम् । न हि यत्क्वचिद् यदपेक्षं तत्सर्वत्र तदपेक्षमिति नियमः । स्वेदादिशैत्यग्रहे वायुसापेक्षस्य स्पर्शनस्य, औष्ण्यग्रहे तदभावसापेक्षत्वात् ॥२।२।३९॥

आलोकाभावमात्रमपि न ॥२।२।४०॥

आलोकाभाव एव तम इत्यपि न । सत्यप्यालोकेन्धस्य दिवान्धस्योलूकादीनां चान्धकारस्य प्रतीतेः । किं च सिद्धान्ते भावस्यास्वीकारात्, यो देशकालादिभेदो वस्तुस्वभावनियामकः स एव लाघवादभावव्यवहारस्यापि नियामकोस्तु । किमतिरिक्ताभावकल्पनेन ॥२।२।४०॥

अनुपलब्धेश्च ॥२।२।४१॥

अभावस्यानुपलब्धिरपि तदेव बोधयति । यद्यनुपलम्भादभावस्यास्वीकारस्तर्हि रूपादीनामप्याश्रयव्यतिरेकेणानुपलम्भात्त्यागप्रसङ्गः । न तेषामनन्यथासिद्धबुद्धिसिद्धत्वात् । अभावस्य तु भावविशेषैरेवान्यथासिद्धत्वेन त्यागः समुचित एव । अभावाभावस्य भावत्वमिव भावस्याप्यभावत्वं वेदितव्यम् ॥२।२।४१॥

चेतनं प्रत्याधेयत्व-विधेयत्व-शेषत्व-नियमैरपृथक्सिद्धो द्रव्यविशेषः शरीरम् ॥२।२।४२॥

आधेयत्वमाश्रितत्वम् । विधेयत्वं नियाम्यत्वम् । शेषत्वमङ्गत्वम् । यावत्सत्तमसम्बन्धानर्हत्वमपृथक्सिद्धत्वम् । चेतनं प्रत्याधेयत्वादिनियमैर्योपृथक्सिद्धो द्रव्यविशेषः स शरीरम् । आधेयत्वविधेयत्वशेषत्वेष्वन्यतमेनैव सिद्धे इतरद्वयोच्चारणं व्यर्थमित्यरुचेराह नियमेनेति । यस्य चेतनस्य यदवस्थं द्रव्यं यावत्सत्तमसम्बन्धानर्हं स्वशक्ये नियन्तव्यस्वभावं तदवस्थं तस्य शरीरमित्याचार्याः ॥२।२।४२॥

ईश्वरतज्ज्ञानव्यतिरिक्तं द्रव्यं शरीरमिति वा ॥२।२।४३॥

इदं शरीरस्य तटस्थलक्षणम् । यावल्लक्ष्यकालमनवस्थायित्वे सति यद्व्यावर्तकं तत् तटस्थलक्षणमुच्यते । गन्धवत्त्वं पृथिव्यास्तटस्थलक्षणम् । यतो महाप्रलये परमाणुपूत्पत्तिकाले घटादिषु च गन्धाभावात् तत् तटस्थलक्षणम् । लक्षणं द्विविधं भवति तटस्थलक्षणं स्वरूपलक्षणं च । स्वरूपान्तर्गतत्वे सति व्यावर्तकं स्वरूपलक्षणम् । ईश्वर-तज्ज्ञानव्यतिरिक्तं द्रव्यं जीव-नित्यविभूतिप्रकृति-कालादिचतुष्टयम् । चेष्टेन्द्रियार्थाश्रयः शरीरमितिगोतमोक्तशरीरलक्षणं तु नास्माकमभिमतम् । जीवभूतब्रह्मशरीरे व्याप्तेः ॥२।२।४३॥

तद् द्विविधं नित्यमनित्यं च ॥२।२।४४॥

स्पष्टम् ॥२।२।४४॥

नित्यमीश्वरस्य ॥२।२।४५॥

जीवरूपशरीरं जगत्कारणीभूताचिद्रूपशरीरं चेश्वरस्य नित्यम् ॥२।२।४५॥

अनित्यमीश्वरभिन्नानाम् ॥२।२।४६॥

स्पष्टम् ॥२।२।४६॥

त्रिगुणद्रव्यकालजीवशुभाश्रयादिकमीश्वरशरीरम् ॥२।२।४७॥

स्पष्टम् ॥२।२।४७॥

पुनस्तद्द्विविधं स्थावरजङ्गमभेदात् ॥२।२।४८॥

स्थावराः शिलातृणगुल्मलतादयः । देवमनुष्यतिर्यङ्नारकिभेदाच्चतुर्धा जङ्गमाः ॥२।२।४८॥

उद्भिज्जस्वेदजजरायुजाण्डजभेदभिन्ना अपि चत्वारः ॥२।२।४९॥

स्पष्टम् ॥२।२।४९॥

अण्डोत्पादनात्पूर्वसृष्टिः समष्टिसृष्टिः ॥२।२।५०॥

स्पष्टम् ॥२।२।५०॥

अनन्तरसृष्टिर्व्यष्टिसृष्टिः ॥२।२।५१॥

स्पष्टम् ॥२।२।५१॥

महदादीनां सृष्टिरवस्थान्तरापत्तिः ॥२।२।५२॥

स्पष्टम् ॥२।२।५२॥

प्रकृतिमहदहङ्कारैकादशेन्द्रियतन्मात्रपञ्चकभूतपञ्चकविभागेन चतुर्विंशतिस्तत्त्वानि ॥ ॥२।२।५३॥

व्यष्टिजीवशरीराणामीश्वरं प्रति शरीरत्वं सद्वारकमित्येके ॥२।२।५४॥

स्पष्टम् ॥२।२।५४॥

अद्वारकमित्यन्ये ॥२।२।५५॥

स्पष्टम् ॥२।२।५५

सद्वारकमेवेत्यपरे ॥२।२।५६॥

स्पष्टम् ॥२।२।५६॥

चतुर्मुखपर्यन्ता सृष्टिरद्वारका ॥२।२।५७॥

स्पष्टम् ॥२।२।५७॥

तदन्नतरं सद्वारका ॥२।२।५८॥

स्पष्टम् ॥२।२।५८॥

इति द्वितीयाध्यायस्य द्वितीयः पादः

—०—

समाप्तो द्वितीयाध्यायः

अथ तृतीयेध्याये प्रथमः पादः



अथ ब्रह्म ॥३।१।१॥

चिदचिद्ब्रह्मेति तत्त्वत्रयम्। चिदचितौ निरूपिते। क्रमप्राप्तमथ ब्रह्म निरूप्यते ॥३।१।१॥

बृंहणाद्ब्रह्म ॥३।१।२॥

सृष्टिं बृंहयति वर्धयतीति ब्रह्म। बृंहणं हि जननपूर्वकं भवति। तेनार्थादायातं सृष्टिकर्तृत्वं ब्रह्मण एव। एवं च जन्माद्यस्य यत इतिवैयासिकं सूत्रमिह गतार्थम् ॥३।१।३॥

तदेवेश्वर-परमेश्वर-परमात्मादिशब्दवाच्यम् ॥३।१।२॥

तदेव ब्रह्मेश्वरशब्देन परमेश्वरशब्देन परमात्मशब्देन क्वचिदात्मशब्देनापि शास्त्रेषु लोकेषु प्रसिद्धं व्यवहृतं च ॥३।१।३॥

समस्तद्रव्याद्रव्यशरीरि ३।१।४॥

सर्वेषां द्रव्याणामद्रव्याणां गुणानां च तच्छरीरि। द्रव्यमद्रव्यं सर्वं तच्छरीरम्। यस्यात्मा शरीरं यस्य पथिवीशरीरमित्यादि मानमत्र। जगत्सर्वं शरीरं ते इति परमर्षिवचनम्। एवं च रामशब्दवाच्यमपि ब्रह्मैव ॥३।१।४॥

विभु चेतनं च ॥३।१।५॥

तद्ब्रह्म विभु चेतनं चास्ति। विविधं भवतीति विविधं जगद्भावयतीति ब्रह्म। "सोकामयत बहु स्याम्" इति श्रुत्या तस्य बहुभवनं स्पष्टम्। बहुभवनमेव विविधभवनम्। "ततो रात्र्यजायत....." इत्यादिना बहुभवनं स्पष्टम्। एवं च विभुत्वं सर्वगतत्वं व्यापकत्वं वा। तच्च तत्समानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकधर्मवत्वम्। विभुत्वे सति चेतनत्वं ब्रह्मलक्षणम्। ईश्वरस्य विभुत्वे "अनुप्रविश्य नामरूपे व्याकरवाणि" इति श्रुत्युक्तमनुप्रवेशो नोपपद्यत इति न हि वाच्यम्। विलक्षणसंयोगस्यैव तत्रानुप्रवेशशब्दार्थत्वात्। स पर्यगादिति श्रौतवचनेनापि तस्य सर्वव्यापकत्वम्। विभुत्वं सर्वगतत्वमित्युक्तम्। तच्च त्रिधा। स्वरूपतो धर्मभूतज्ञानतो विग्रहतश्चेति ॥३।१।५॥

अनुप्रवेशो नासिद्धः ॥३।१।६॥

ननु तस्य विभुत्वे "तत्कृत्वा तदेवानुप्राविशत्", "अनुप्रविश्य नामरूपे व्याकरवाणि" इत्यादिश्रुतिप्रतिपादितस्तस्यानुप्रवेशो नोपपद्यत इति चेत्, उक्तम्। किमुक्तम् ? अनुप्रवेशो विलक्षणसंयोग एवेति ॥३।१।६॥

सर्वकर्मसमाराध्यं च ॥३।१।७॥

सर्वैरेव सत्कर्मभिस्तत्समाराध्यं च भवति। सर्वकर्मेत्यत्र सर्वसत्कर्मेति बोध्यम्। नह्यसत्कर्मभिर्भगवदाराधनं भवति। आराधनं नाम गौरवितवृत्तिनिष्ठप्रीतिहेतुभूता क्रिया। अत्र गौरवितवृत्तित्वमुपलक्षणम्। गौरवं नु आराध्यत्वावगाही ज्ञानप्रभेदः। अयं ज्ञानप्रभेद एव भक्तिरित्युच्यते। गौरवितप्रीतिहेतुक्रिया आराधनमिति किरणावलिः। निरतिशयानन्दप्रियानन्यप्रयोजनसकलेतरवैदतृष्ण्यवज्ज्ञानविशेषो भक्तिरिति श्रीवैष्णवाचार्याः। माहात्म्यज्ञानपूर्वः सुदृढः स्नेहो भक्तिरिति वा। अनन्यसमता विष्णौ ममता प्रेमसंगता। भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैः ॥ इति नारदपाञ्चरात्रे। येप्यन्यदेवताभक्ता यजन्ते श्रद्धयान्विताः। तेपि मामेव कौन्तेय यजन्त्यविधिपूर्वकम् ॥ इति गीतावचनं न विद्वन्मनोरमम्। सर्वकर्माराध्यत्वं चेत्तस्य लक्षणं तर्हि मद्यमांसादिभिर्मूर्खैराराध्यन्ते भूतपिशाचाद्यास्तत्पूजनमपि भगवत्पूजनमेव स्यात्। तत्तु न हि सतां पन्थाः। यद्यपि शरीरशरीरिणोरभेदस्वीकाराद्भूतप्रेतपिशाचादीनामपि ब्रह्मत्वे

न कोपि बाधः परन्तु ब्रह्मधिया तेषामुपास्यत्वं तु सर्वथा बाधितमेव। जीवब्रह्मणोर्जगद्ब्रह्मणोर्वा शरीर-शरीरिभावो न ब्रह्मधः पातयितुम्। तत्तु नैसर्गिकम्। किं च जीवानां ब्रह्मशरीरत्वं शरीरशरीरिणोश्चाभेद-स्वीकारः केवलं धार्यत्वेन स्वच्छयोपयोज्यत्वेन च। किं चाविधिपूर्वकं यजनं न भवति भगवत्प्रसादजनकम्। यदि मद्यमांसादिभिर्यजनमपि भगवत्प्रसादकमिति स्वीक्रियते महती धर्महानिः प्रजाहानिश्च भवेताम्। मद्यस्पर्शोपि भवति पस्पशाय। मत्स्यमित्सापि भवति हिंसाजनिकाहिंसाधर्मोत्सादिका च। सा च नाभिमता भगवद्यजनफलत्वेन। धर्मलाभायैव प्रजोत्कर्षायैव च भगवदाराधनं लोके संवृत्तं प्रवृत्तं च। यद्यन्याय्यमपि यदि दुराचारोपि यद्यज्ञानप्रयोज्यव्यवहारोपि भगवत्स-न्तोषाय भवतीति मतं, हन्त सर्वेषां सदाचारविचार-चारुपथपथनशीलानां सुशीलानां जनानां हिंसाव्यभि-चारमादकद्रव्यादिसेवनविधुराणां धर्मधुरन्धराणां तादृशाद्भगवतो विरक्तिरेव स्यात्। तथा च पापिभिः सेव्य ईश्वरः पाप इति प्रसिद्धिरतिदुर्वारा स्यात्। तच्च महत्कष्टम् ॥३।१।७॥

तस्यैव त्रिविधकारणता ॥३।१।८॥

ब्रह्मण एव त्रिविधकारणता सिद्धान्तसंमता। निमि-त्तोपादानसहकारिभेदेन कारणानि जगतस्त्रीण्येव। तत्त्रिविधमपि कारणं ब्रह्मैव। बहु स्यामितिसंकल्प-वेषेण तन्निमित्तकारणं भवति। सूक्ष्मचिदचिद्विशिष्ट-वेषेण तदुपादानं भवति। ज्ञानशक्त्यादिविशिष्टवेषेण तदेव सहकारिकारणं भवति। ननु ब्रह्मणो जगदुपा-दानत्वे विकारित्वं स्यात्, उपादानगतसर्वदोषाणां तत्रैव सिद्धेः। न यद्यपि ब्रह्म चिदचिद्विशिष्टं भवति तथापि विकारस्य परिणामस्य च विशेषणद्वारैव तस्मि-न्स्वीकृतत्वात्। ऊर्णनाभेस्तन्तुप्रसारणरूपकार्यं प्रति स्वशरीरभूतविशेषणद्वारैव कारणत्वं यथा तथा ब्रह्म-णोपि ज्ञेयम्। बाल्ययुवत्वस्थविरत्वह्रस्वत्वदीर्घत्वादि-विकाराः शरीर एव प्रभवन्ति न शरीरिण्यात्मनि। विशिष्टे वस्तुनि विकारो योग्ये तत्त्व एव प्रवर्तते नान्यथा। विकार्यमेव विकारो विकुरुते नाविकार्यमपि। न हि सर्पः शिवस्य प्रभवति। न हि विषभक्षणं शिव-स्याशिवायाभूत। न ह्यर्धनारीश्वरे नारीप्रणीतदोषो-स्थानं केनापि दृष्टचरम्। एवं हि सर्वेषामपि ब्रह्मणि जीवादिशरीरगतदोषाः शरीरिणि तन्निष्ठा न संक्रामन्ति। न चैकस्यैव निमित्तत्वमुपादानत्वं विरुध्यमिति भ्रमि-तव्यम्। ब्रह्मणो विलक्षणशक्तियोगात् लोपत्वस्य सर्वैरेव ब्रह्मवादिभिः स्वीकृतत्वात्। अत एव न्याय्ये पथि संचरणशीलेषु कृतावतारः रामादिरूपवगामिषु दण्डावतारस्तस्य प्रसिद्ध एव। लोके कुलालदण्डयोर्नास्ति सामानाधिकरण्यम्। अथवा स्थानाम लोकेपि तत्। न हि लोकः परलोकान्तरलोकं वा लोकाद्भूयो भिद्यते। एक एव जीवात्मा स्त्री-पुरुषादीनामुत्पाद-कत्वेन कर्तृत्वमपि भजते कारणत्वेन ॥३।१।८॥

सर्वज्ञम् ॥३।१।९॥

तद्ब्रह्म सर्वज्ञमपि। सर्वज्ञत्वाभावे जीवकृतसुकृत-दुष्कृतादिफलादिविधाने तस्यानाप्तार्थमेव स्यात्। न च तेन न कापि हानिरिति वाच्यम्। तस्यानिरोधकेसह्या-नाचारात्याचारादिपरम्परा प्रसङ्गात् ॥३।१।९॥

सर्वाधारः ॥३।१।१०॥

ब्रह्मैव सर्वाधारतां भजति। तथाहि श्रुतिः "एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिव्यौ विधृते तिष्ठतः" इति श्रुतिसिद्धं तस्य सर्वाधारत्वम्। स दाधार पृथिवीं द्यामुतेमामित्यपि श्रुतिस्तदर्थवादिन्येव ॥३।१।१०॥

अनन्तम् ॥३।१।११॥

तच्च ब्रह्मानन्तं भवति। न ह्यत्र संख्ययानन्त्यं विवक्षितम्। तस्यैकत्वस्य सर्वतन्त्रसिद्धत्वात्। आनन्त्यं चेह त्रिविधपरिच्छेदराहित्यम्। देशपरिच्छेदः काल-परिच्छेदो वस्तुपरिच्छेदश्चेति परिच्छेदत्रैविध्यम्। इया-नेव तस्य देश इति देशपरिच्छेदः। एतत्कालावच्छिन्नमेव तदवस्थितिरिति कालपरिच्छेदः एतद्वस्तुतुल्यं तदिति वस्तुपरिच्छेदः। सर्वविधपरिच्छेदराहित्यमेव तस्य ॥३।१।११॥

सत्यत्व ज्ञानत्वानन्दत्वादयः स्वरूपनिरूपकधर्माः ॥३।१।१२॥

एते ब्रह्मणः स्वरूपं निरूपयन्तीति स्वरूपनिरूपक-धर्मत्वेनैषां प्रसिद्धिः। सत्यं ज्ञानमनन्तं ब्रह्मेति श्रुति-रत्र प्रमाणः। सत्यत्वं त्रिकालाबाध्यत्वम्। "यत्र द्रष्टा च

दृश्यं च दर्शनं चाविकल्पितम्। तस्यैवार्थस्य सत्यत्वमाहुस्त्वय्यन्तवेदिनः ॥" इत्ति सर्वदर्शनसंग्रहः। "वयुनानि विद्वान्" इति वेदवचनेन ज्ञत्वमपि तस्य सिद्धमेव। ज्ञत्वज्ञानत्वयोरनर्थान्तरमिह। "आनन्दं ब्रह्म" इतिश्रुतिवचनात्तस्यानन्दत्वम्। इदं त्ववधेयं नहि, यत्किञ्चिद्वचनबलात्तस्यानन्दत्वमपि तु स्वतः सिद्धं तत् तत्तद्वचनानि यथा वानुवदन्ति ॥३।१।१२॥

सर्वज्ञत्वसर्वशक्तित्वादयः सृष्ट्यर्थाः ॥३।१।१३॥

सर्वज्ञत्वादयो धर्माः सृष्ट्यर्था भवन्ति। अत एव कैः कैर्जीवैः संसारदशायां किमपेक्षितं स्यात् कुत्र वा तैरवस्थेयं किं च भोक्तव्यं किं च पातव्यमित्यादिज्ञानवद्ब्रह्मसर्वेषामानुकूल्यं सम्पादयति। कस्को जीवः कदा कुत्र किं करोतीत्यपि साकल्येन तद्वेत्ति। मनुष्याणां कृते पृथिवी मत्स्यादीनां कृते जलं सिंहव्याघ्रादीनां कृते वनं विहगादीनां कृते तर्वादय इति सर्वा व्यवस्थास्तस्य सर्वज्ञत्वं प्रदीपयन्ति। स त्रिकालज्ञोस्ति न वेति प्रश्नो जाड्यमवतारयति प्रश्नकृतः। ब्रह्म कालमर्यादामतीत्य तिष्ठति। अकारो जातः, अस्ति, नश्यति, व्यनश्यदिति व्यवहारा जीवानाम्। सर्ववस्तुविषयेस्तीत्येव ब्रह्मज्ञानम्। यल्लोकानां भविष्यति तदपि यच्चाभूत्तदपि तस्य ज्ञाने सर्वदा वर्तमानमेव। नश्यन्नङ्क्ष्यन्नष्टं सर्वं मानवं ज्ञानम्। मानवानां तथैव प्रतीयमानत्वात्। ब्रह्मज्ञाने तु न त्रैविध्यम्। सर्वेषां वस्तूनां तत्र सातत्येन करामलकवत्प्रतीयमानत्वात्। तत्सर्वशक्त्यपि। अत एव पृथिव्यादीनां लोकानां सूर्याचन्द्रमसोर्बहूनां च ब्रह्माण्डानां धारकत्वं तस्य सुस्थम्। "स दाधार पृथिवीं द्यामुतेमाम्" इत्यादिश्रुतिरप्यत्र प्रमाणम्। ब्रह्म कर्तुमकर्तुं तु समर्थम्। अन्यथा कर्तुं न समर्थम्। तर्हि तत्रासामर्थ्यं प्रतिपादितं भवतीति न। अन्यथाकरणं तत्स्वभावविरुद्धम्। व्याहतमनीश्वरो घटयतीति न तस्य सर्वशक्तित्वं ब्रूमः। किन्तु यत्कार्यं तत्सर्वं करोति ततश्चान्यैरप्यशक्यं करोतीति। ईदृशमस्य सर्वशक्तित्वमितिसर्वार्थसिद्धौ ॥३।१।१३॥

प्रेमातिशय आश्रयणोपयुक्तो धर्मः ॥३।१।१४॥

प्रेम्ण आश्रयो लौकिकः पदार्थोलौकिकश्चेति। लौकिकाश्रयं प्रेम नात्र जिघृक्षितम्। तल्लोकायैवोपयुज्यते। भगवानलौकिकः। तत्सम्बद्धं प्रेमापि तथा। यः प्रेम करोति यस्मिंश्च करोति तावुभावैवाश्रयावेकस्यैव प्रेम्णः। एवं च यथा सम्बन्धो द्विष्ठो भवति तथा प्रेमापि द्विष्ठम्। अत एवोक्तम्—"परस्पराश्रयधनं निरूढं भावबन्धनम्। यदेकापायतोपायि तत्प्रेमेति निगद्यते ॥" द्विष्ठमपि प्रेम कदाचिदेकस्थमपि भवति। द्वयोरेकाश्रयस्य नाशे प्रेम्ण एकस्थता। आश्रयनाशेपि प्रेम्णोनाशात्सर्वदा द्विष्ठत्वमेव तस्येत्यपि प्रतिपादनीयम्। स्वर्गं गतवत्यपि प्रेमाश्रये न निवर्तते तस्मात्प्रेमेति न तद्द्विष्ठत्वहानिः। भगवति जीवश्रेयसे प्रेमातिशयो विद्यते। भगवन्निष्ठं भक्तं प्रति प्रेम भक्तहृदयं स्पृशति लभते च तत्र स्थानम्। एवं भगवद्विषयकं भक्तनिष्ठं प्रेम भगवद्हृदयं स्पृशति लभते च तत्र स्थानम्। एवं च प्रेम्णोलौकिको महिमा। प्रेमातिशय आश्रयणाय कमपि प्रेरयति। अतः प्रेमातिशय आश्रयणायोपयुक्तो धर्मः। एवं च प्रेम हृदयावर्जकं तत्त्वम्। प्रेमवात्सल्ययोर्नातिदूरगामिनी भिदा। प्रेमप्राचुर्यादेव तस्य सौलभ्यमपि। सौशील्यं तु तस्य स्वभावसिद्धम् ॥३।१।१४॥

कारुण्यादय उभयथा ॥३।१।१५॥

कारुण्यमाश्रयणोपयुक्तमपि रक्षणोपयुक्तमपि। कारुण्यादेव कस्यापि जीवस्य मुमूर्षो रिरक्षिषा संजायते। कारुण्यमेवावलोक्याशिश्रियापि जायत आश्रयैषिणाम्। कारुण्यादीत्यत्रादिशब्देन भक्तैः प्रपन्नैश्चाश्रेयाणां सर्वेषां धर्माणां संग्रहः। कारुण्यं च स्वार्थमनपेक्ष्य परदुःखप्रहाणेच्छा।

यथा—स तं निपतितं भूमौ शरण्यः शरणागतम्।
वधार्हमपि काकुत्स्थः कृपया पर्यपालयत् ॥
पुरतः पतितं देवी धरण्यां वायसं तदा।
तच्छिरः पादयोस्तस्य योजयामास जानकी ॥
प्राणसंशयमापन्नं दृष्ट्वा सीताथ वायसम्।
त्राहि त्राहीति भर्तारमुवाच दयया विभुम् ॥
तमुत्थाप्य करेणाथ कृपापीयूषसागरः।
ररक्ष रामो गुणवान्वायसं दययैक्षत ॥

यथा वा हनुमन्तं प्रति भगवत्या वचनम्—

पापानां वा शुभानां वा वधार्हाणां प्लवङ्गम।
कार्यं करुणमार्येण क कश्चिन्नापराध्यति ॥

यथा वारण्यकाण्डे

निपपातावशो भूमौ रुरोद सहलक्ष्मणः ।
द्विगुणीकृततापार्तो रामो धीरतरोपि सन् ॥
सीताहरणजं दुःखं न मे सौम्य तथागतम् ।
यथा विनाशो गृध्रस्य मत्कृते च परन्तप ॥
या गतिर्यज्ञशीलानामाहिताग्नेश्च या गतिः ।
अपरावर्तिनां या च या च भूमिप्रदायिनाम् ॥
मया त्वं समनुज्ञातो गच्छ लोकाननुत्तमान् ।

कारुण्यादीत्यत्रादिपदेन भक्तेः प्रपन्नेश्चाश्रेयाणां सर्वेषां धर्माणां संग्रहः ॥३।१।१५॥

इति विशिष्टाद्वैतदर्शने तृतीयाध्याये प्रथमः पादः

अथ तृतीयेऽध्याये द्वितीयः पादः

तच्च पञ्चविधम् ॥३।२।१॥

तद्ब्रह्म पञ्चविधमितिसाम्प्रदायिकाः । पञ्चविधधर्माश्रयत्वात्पञ्चविधमित्युक्तम् ॥३।२।१॥

पर-व्यूह-विभवान्तर्याम्यर्चावतारभेदात् ॥३।२।२॥

परो व्यूहो विभवोन्तर्यामी चार्चावतारश्चेति पञ्च प्रकारास्तस्येति रहस्यविदः ॥३।२।२॥

परः श्रीरामः ॥३।२।३॥

पालनात् पूर्णत्वाच्च परः श्रीराम उच्चते । पॄपालनपूरणयोः । पिपर्ति सकलं जगदितिपरः । अत एव सकलजीवानां रमणस्थानं हि सः । रमते सर्वस्मिञ्जगति रमयति वा निखिलं जगदिति रामः । स च निखिलावतारकारणभूतोवतारो न चावतार एव परः । उक्तं श्रीवाल्मीकिसंहितायाम्—"परो हि भगवान्रामः परे लोके विराजितः ।" अतः सकलावतारहेतुभूतः परस्मिल्लोके विराजमानः श्रीराम एव परः ॥३।२।३॥

वासुदेवादयश्च चतुर्धा व्यूहः ॥३।२।४॥

व्यूह इति साङ्केतिकः शब्दः । विशेषेणोहितत्वाद्व्यूहः । स च चतुर्धा । ते च वासुदेवादयः ॥३।२।४॥

व्यूहं स्पष्टयति—

वासुदेवसंकर्षणप्रद्युम्नानिरुद्धाः ॥३।२।५॥

वासुदेवः संकर्षणः प्रद्युम्नः अनिरुद्धश्चेति चतुर्धा व्यूहाः ॥३।२।५॥

षड्गुणपूर्णो वासुदेवः ॥३।२।६॥

ज्ञानबलैश्वर्यवीर्यशक्तितेजांसीत्येते षड्गुणाः । तत्र ज्ञानं सर्वदा सर्वविषयप्रकाशकः स्वप्रकाशो गुणविशेषः । बलं समस्तवस्तुधारणसामर्थ्यम् । ऐश्वर्यं समस्तवस्तुनियमनसामर्थ्यम् । वीर्यं स्वरूपविकाराभावो जगदुपादानत्वेपि । शक्तिरघटितघटनसामर्थ्यम् । तेजः पराभिभवनसामर्थ्यम् । एतैर्गुणैः पूर्णो वासुदेव उच्यते । "संकर्षणश्च प्रद्युम्नोनिरुद्ध इति भेदतः । विज्ञेयश्च त्रिधा व्यूहो जगत्सृष्ट्यादिकारकः ।" अत्र वासुदेवो न परिगणितः ॥३।२।६॥

ज्ञानबलाभ्यां पूर्णः सङ्कर्षणः ॥३।२।७॥

ज्ञानबले उक्ते । अन्यत्स्पष्टम् ॥३।२।७॥

ऐश्वर्यवीर्याभ्यां प्रद्युम्नः ॥३।२।८॥

ऐश्वर्यवीर्ये उक्तार्थे ॥३।२।८॥

शक्तितेजोभ्यामनिरुद्धः ॥३।२।९॥

शक्ततेजसी उक्ते । एतेषां चतुर्णां कार्यम्-सङ्कर्षणस्य शास्त्रप्रवर्तनं संहारश्च । प्रद्युम्नस्य धर्मनयनं सृष्टिश्च । अनिरुद्धस्य तत्त्वगमनं रक्षणं च । तथा हि स्मृतिः—

बलेन हरतीदं स गुणेन निखिलं मुने ।
ज्ञानेन तनुते शास्त्रं सर्वसिद्धान्तगोचरम् ॥

ऐश्वर्येण गुणेनासौ **सृजते तच्चराचरम्** ।
वीर्येण सर्वधर्माणि **प्रवर्तयति सर्वशः** ॥
शक्त्या जगदिदं **सर्वमनन्ताण्डं निरन्तरम्** ।
बिभर्ति पाति च हरिर्मणिसानुरिवाण्डकम् ॥
तेजसा निखिलं तत्त्वं ज्ञापयत्यात्मनो मुने ।इति।

यथा वा वाल्मीकिसंहितायाम्--

परो हि भगवान् रामः परे लोके विराजितः ॥
सङ्कर्षणश्च प्रद्युम्नोनिरुद्ध इति भेदतः ।
विज्ञेयश्च त्रिधा व्यूहो जगत्सृष्ट्यादिकारकः ॥
पूर्णो ज्ञानबलाभ्यां च संकर्षण इति स्मृतः ।
वीर्यैश्वर्ययुतस्तत्र प्रद्युम्न इति कथ्यते ॥
शक्तितेजोविशिष्टस्तु ह्यनिरुद्ध इतीरितः ॥इति।

मन्ये भाक्तोयं विभागः । चतुर्भिर्व्यूहैर्यत्क्रियते तत्सर्वं पारमेश्वरं कार्यम् । न हि परमेश्वरः स्वकार्ये कस्यापि साहाय्यं जिघृक्षति । सर्वतन्त्रस्वतन्त्रो हि सः । षण्णां गुणानां सङ्कीर्तनं जगदपेक्षया । वस्तुतस्तु सोनन्तगुणः । अनन्तगुणस्य गुणसंख्यानं संख्यया नियमनं च सर्वं बालिशकार्यम् । किं च सर्वेष्वेव व्यूहेषु पाड्गुण्यस्थितावपि तत्तद्व्यूहे गुणद्वयस्यैव प्रकाशितत्वाद्गुणचतुष्टयस्य च निगूहितत्वाद्गुणद्वयोक्तिः सर्वत्र । किं च वासुदेवादीनि नामानि ब्रह्मबोधकान्येव । तथा हि वासयति सर्वं जगत्स्वस्मिन्नितिवासुः । वासुश्चासौ देवश्च वासुदेवः । संकर्षति सर्वं जगत् स्वं प्रतीति संकर्षणः । सर्वं जगद्ब्रह्माभिगच्छति । प्रकृष्टं द्युम्नं तेजो यस्य स प्रद्युम्नः । सोपि भगवानेव । न निरुद्धः केनापि सोनिरुद्धः । न हि भगवान् केनापि कदापि कथमपि निरोधव्यः । अतस्तत्तत्कार्यं कुर्वन् भगवानेव तत्तन्नाम भजते । एवं च वेदाविरोधोपसारणीयो भवति । वेदेषु सर्व एव जगद्व्यापारो ब्रह्मकर्तृक एवेतिप्रतिपादितम् । परिगणितानां षण्णां गुणानां ततोप्यधिकानां ब्रह्मण्येव नैयत्येन सत्त्वात् । सम्प्रदायपद्धतिपरिज्ञानाय सर्वेषां गुणानां पार्थक्येन सूत्रणम् ॥३।२।९॥

विभवो दशधा ॥३।२।१०॥

विभवो द्विविधः । मुख्यो गौणश्च । मुख्यः साक्षादवतारः । आवेशावतारो गौणः । आवेशोपि द्विविधः । स्वरूपावेशः शक्त्यावेशश्च । स्वरूपावेशः स्वेन रूपेणावेशः कार्यकाले यस्मिन् कस्मिन्नपि चेतने शक्तिमात्रेण स्फुरणं शक्त्यावेशः । पुनः स दशधा । ते च मत्स्यादयः । आदिशब्देन कूर्मवराहनृसिंहवामनपरशुरामश्रीरामबलभद्रश्रीकृष्णकल्कीनां ग्रहणम् । भक्तत्राणार्थो नृसिंहावतारः । शरणागतरक्षणार्थो मोक्षोपायदर्शनार्थो धर्ममर्यादास्थापनार्थश्च श्रीरामावतारः । शरणागतरक्षणार्थो दयापरवशः सन् न्यायरक्षणार्थो मोक्षोपायदर्शनार्थश्च श्रीकृष्णावतारः । षट्त्रिंशदेकोनचत्वारिंशद्वा तत्तच्छास्त्रेषूपवर्णिता अवतारः तत्तच्छास्त्रेभ्य एव परिचेयाः । अवताराणां हेतुः स्वेच्छैव । दुष्कृतां विनाशः सतां परित्राणं च तत्प्रयोजनम् । अन्तर्यामित्वं सर्वत्र जीवसुहृत्त्वेन हृदयप्रदेशावस्थितं तत्तद्दोषैरस्पृष्टं चेति । अर्चावतारस्तु मूर्तिविशेषः । स च स्वयंव्यक्त-दैव-सैद्ध-मानुषभेदाच्चतुर्विधः । अर्चावतारस्य पाड्गुण्याश्रयत्वमपि शास्त्रे प्रोक्तम् । तथा हि—

सर्वातिशयषाड्गुण्यं संस्थितं मन्त्रबिम्बयोः ।
मन्त्रे वाच्यात्मना नित्यं बिम्बे तु कृपया स्थितम् ॥

इदं त्ववधेयम्—सर्वास्वेवावस्थासु श्रीविशिष्ट एव भगवदवस्थानम् । उक्तं च—

नित्यैवैषा जगन्माता विष्णोः श्रीरनपायिनी ।
यथा सर्वगतो विष्णुस्तथैवेयं द्विजोत्तम ॥
देवत्वे देवदेहेयं मनुष्यत्वे च मानुषी ।
विष्णोरेवानुरूपां वै करोत्येषात्मनस्तनुम् ॥

अत्रेदं त्ववश्यमवधेयम्—प्रथमतोर्चावतारस्योपासन उपासकस्याधिकारः । ततो विभवस्य । ततो व्यूहस्य ततोन्तर्यामिण इति । क्रमोयं प्रायिकः । दूरगतोपासनस्य तु साक्षाद्भगवति श्रीराम एव रतिः ॥३।२।१०॥

एतत्सर्वं सम्प्रदायसिद्धान्तावगत्यर्थम् ॥३।२।११॥

एतत्सर्वं शास्त्रदृष्टार्थनिरूपणं श्रीसम्प्रदायसिद्धान्तावगतये प्रतिपादितम् । उपास्यस्तु अनन्तकल्याणगुणगणसम्पन्नो भगवान् श्रीराम एव । भगवती सीता तु भगवत्स्वरूपैव न व्यतिरिक्ता । व्यतिरिक्तापादनं तु लीलाविग्रहशोभातिशयप्रदर्शनार्थमेवेति । वस्तुतस्तु शक्तिशक्तिमतोरभेदाद्भगवत इव भगवत्या अपि सर्वशक्तिमत्त्वं व्यापकत्वमुपास्यत्वं चावधेयम् ।

अनन्या राघवेणाहं भास्करेण प्रभा यथा।
अनन्या च मया सीता भास्करेण प्रभा यथा ॥

इत्यादिपरमर्षिवागवतारोप्यत्रैव। अनेनैकायनकुदृष्ट्यादेरनवकाश इतिश्रीवेदान्ताचार्यस्तत्वत्रयचुलुकसंग्रहे ॥३।२।११॥

अकायमिति वेदः ॥३।२।१२॥

तच्च ब्रह्माकायमितिशुक्लयजुर्वेदः। तथा हि—स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम्। कविर्मनीषी, इत्यादिः। यदि ब्रह्माकायं, कायविरहे मनसो हृदयस्याप्यभावः। कुत्र तर्हि ब्रह्मणो दयाया वात्सल्यस्य च निवासः? धर्मिणमतिहाय न धर्मविस्थानम्। वात्सल्यं हि मानसो गुणः। दयापि तथा। सत्यम्। सर्वशक्तिनि ब्रह्मणि तदपि संभवति यदसम्भवं प्रतीयेत। यद्धि संकल्पवशादेव निखिलमिदं विचित्रचरित्रं रचयांचकार जगत् तस्यानन्तशक्तिनः शक्तिगौरवे पाटवे माहात्म्ये सामर्थ्ये च न विचिकित्सा साधीयसी। अत एव तु शुद्धमपापविद्धं कविर्मनीषी परिभूः स्वयम्भूरित्यादि तत्रैव वेदेनैवोक्तम्। सिद्धो मानवोपि यदिच्छति तत्करोति तदुत्पादयति तदेव च दर्शयति किं तर्हि वक्तव्यं सर्वसिद्धिसिद्धेश्वरविषये? यो हि सङ्कल्पमात्रेण महाप्रभावौ सूर्याचन्द्रमसौ व्यदधात्, यश्च सततगतिशीलजलालयं महार्णवं व्यदधात्, यश्च पृथुं पृथ्वीमप्रथयत्, यश्च विविधानि नक्षत्राण्यक्षतान्यतक्षणोत् तस्य माहात्म्यं तु दुरवगाहमेव। सर्वे मुनयो यस्य शक्तिमाहात्म्यं पुनः पुनरुज्जगुः, यस्य पारम्यं परमर्षयोपि सर्वविद्याविदोपि नाज्ञासिषुः, यस्याकलनीयाः कलाः कलाधरा अपि वासुन्धरा नावकलयितुं समर्था बभूवुस्तस्य विषये तु केवलमेतदेव वक्तव्यम् "महाकल कलानाथ, न त्वां ज्ञातुं क्षमा वयम्। कः कियान् वाथ किंवान्वा त्वमसीति त्वमेव वित्॥" अथवा न तत्र मन्त्रेऽकायमित्यस्य कायराहित्यमित्यर्थः। किन्तु अशब्दप्रत्याय्यम्। कै शब्दे इति हि धातुपाठः। अव्रणमनाच्छादनीयं येन केनापि वस्तुना। वृञ् आच्छादने। अस्नाविरम्। अस्नेयम्। ष्णा शौचे। निसर्गपवित्रमित्यर्थः। तदेव विस्पष्टयति शुद्धमपापविद्धमित्याभ्यां पदाभ्याम्। कविः कौति शब्दं करोति भापत इत्यर्थः। कुङ्शब्दे कुशब्दे इति च धातुः ॥३।२।१२॥

न, मनीषीतिसामर्थ्यात् ॥३।२।१३॥

ब्रह्माकायमिति न। तत्रैव मनीषीति पदं पठ्यते। मनीषा यस्यास्तीति मनीषी। मनीषा मनोकर्मः। मनोभावे तद्धर्माभावः। एवं च शरीराभावे मनीषित्वं ब्रह्मण्यनुपपन्नं स्यात्। तथा च वेदस्याप्रामाण्यं स्यात्। तच्च सर्वेषां वेदाभिमानिनां दुरुद्वहम् ॥३।२।१३॥

ननु "परो हि भगवान् रामः" इत्युक्तम्। कथं तर्ह्यत्र विभवेषु तस्य परिगणनम् इत्याह—

रामोवतार्यवतारश्च ॥३।२।१४॥

सर्वेषामवतारणां हेतुभूतः श्रीरामः। अत एव रामावतारोत्युच्यते। तदेवोक्तं श्रीमद्रामायणसंहितायां "श्रीरामः स परं ब्रह्मेति। दाशरथिर्न्यायोध्यायां स एवावातरत्। अत्र रहस्यावतारः स हि परं ब्रह्मैव यस्य कस्य गृहेवतरति। नेदं गर्हितुमर्हति। अहो तु निरंशम्। अतोंशावतारः, पूर्णावतारः। आवेशावतार इतिविविधावतारणां परिगणनं त्ववतारेषु तारतम्यस्थापनार्थम्। निरंशस्य ब्रह्मणोंशस्यासम्भवात् कथं संभवेदंशावतारः? आवेशावतारस्य तु स्यात्कथंचित् किंचित्समाधानम्। पूर्णावतारस्तु विचार्यते। पूर्णस्य समस्तस्य ब्रह्मणो येन केनापि पार्थिवरूपेण मर्त्यामागमनं तु सर्वथाशक्यम्। व्यापकस्य यतः कुतश्चिच्चक्र तत्र गमनं सर्वथासम्भवम्। अतो यस्मिन् कस्मिन्नपि शरीरे तेजःप्राशस्त्यात्तच्छरीरमवतारशब्देन व्यवह्रियते। तत्तेजःप्राशस्त्यं तु भगवदनुकम्पया वा स्वोपार्जितजपतपआदिफलबलेन वा तच्छरीरे समायातं भवति। श्रीमद्वाल्मीकिरामायणे तु—

कौसल्याजनयद्रामं दिव्यलक्षणसंयुतम्।
विष्णोरर्धं महाभागं पुत्रमिक्ष्वाकुनन्दनम्॥

इत्युक्तम्। तेन रामावतारो विष्णोरर्धो भाग आसीदित्यवगम्यते। ततश्च रामो न पूर्णावतार इति व्यज्यते। विष्णुश्चात्र देवविशेषो न ब्रह्म। न च "अवध्यं दैवतैर्विष्णो समरे जहि रावणम्" इत्यत्र दैवतैरवध्यो रावण इत्युक्त्वा विष्णुः समरे रावणं हन्तुं नियुक्तः। अनेनावगम्यते विष्णुर्न देवेष्वेकतम इति। भवतु नाम स विष्णुर्ब्रह्मेति। तदा ब्रह्मणो वा विष्णोर्वा व्यापकत्वात् कथं तत्रागमनम्? स्वरूपतः सर्वदेशसम्बद्धत्वं हि व्यापकत्वम्। व्यापकस्य गमनागमने न

भवतः। विष्णोरागमनं तु "एतस्मिन्नन्तरे विष्णु-रुपयातो महाद्युतिः। शङ्खचक्रगदापाणिः पीतवासा जगत्पतिः" इत्यादिना स्पष्टम्। एवं चायं विष्णुर्देवे-ष्वन्यतम एवेति प्रतीयते। रामो विष्णुर्वा स्याद्विष्णो-रर्धभागो वा स्यात्, अन्यो वा कश्चन विष्णुः स्यात् न तत्र विवादावसरः। रामः स्वयं विष्णुरासीत्। विष्णुत्वं च वेवेष्टि सर्वं जगदितिविग्रहात्सर्वव्यापक-त्वम्। एवं च सर्वहेयप्रत्यनीकगुणाकारः करुणासागरः साकेतनिकेतनो भक्तवत्सलो भगवान् श्रीराम एवा-वताराणां परमं कारणमित्यनुसरणीया सरणिः।

वाल्मीकिरामायणे—

कर्ता सर्वस्य लोकस्य श्रेष्ठो ज्ञानविदां विभुः॥
कथं देवगणश्रेष्ठमात्मानं नावबुध्यसे।
ऋतधामा वसुः पूर्वं वसूनां च प्रजापतिः।
त्रयाणामपि लोकानामादिकर्ता स्वयं प्रभुः॥
रुद्राणामष्टमो रुद्रः साध्यानामपि पञ्चमः।
अश्विनौ चापि कर्णौ ते सूर्याचन्द्रमसौ दृशौ॥
अन्ते चादौ च मध्ये च दृश्यसे च परन्तप।

इत्यादिकं लोकपालानां वचनम्।

भवान्नारायणो देवः श्रीमांश्चक्रायुधः प्रभुः।
एकशृंगो वराहस्त्वं भूतभव्यसपत्नजित्॥
अक्षरं ब्रह्म सत्यं च मध्ये चान्ते च राघव।
लोकानां त्वं परो धर्मो विष्वक्सेनश्चतुर्भुजः॥
शार्ङ्गधन्वा हृषीकेशः पुरुषः पुरुषोत्तमः।
अजितः खड्गधृग्विष्णु····॥
सेनानीर्ग्रामणीः सर्वं बुद्धिस्त्वं च क्षमा दमः।
प्रभवश्चाव्ययश्च त्वम्·····॥
इन्द्रकर्मा महेन्द्रस्त्वं पद्मनाभो रणान्तकृत्।
शरण्यं शरणं च त्वामाहुर्दिव्या महर्षयः॥
सहस्रशृङ्गो वेदात्मशतशीर्षो महर्षभः।
त्वं त्रयाणां हि लोकानमादिकर्ता स्वयम्प्रभुः॥
सिद्धानामपि साध्यानामाश्रयश्चासि पूर्वजः।
त्वं यज्ञस्त्वं वषट्कारस्त्वमोङ्कारः परात्परः।
प्रभवं निधनं चापि नो विदुः को भवानिति॥
दृश्यसे सर्वभूतेषु गोषु च ब्राह्मणेषु च।
दिक्षु सर्वासु गगने पर्वतेषु नदीषु च॥
सहस्रचरणः श्रीमाञ्शतशीर्षः सहस्रदृक्।
त्वं धारयसि भूतानि पृथिवीं सर्वपर्वतान्॥
अन्ते पृथिव्याः सलिले दृश्यसे त्वं महोरगः।
त्रींल्लोकान्धारयन्नाम देवगन्धर्वदानवान्॥
जगत्सर्वं शरीरं ते स्थैर्यं ते वसुधातलम्।
अग्निः कोपः प्रसादस्ते सोमः·····॥
त्वया लोकास्त्रयः क्रान्ताः पुरा स्वैर्विक्रमैस्त्रिभिः।
सीता लक्ष्मीर्भवान् विष्णुः·····॥

इत्यादिकं ब्राह्मणो वचनं तत्रैव।

न च रामायणे बालकाण्डे रामस्य विष्ण्वर्धभागत्व-बोधनमत्र च युद्धकाण्डान्ते तस्यैव विष्णुत्वादिबोधनं परस्परं विरुद्धमिति भावनीयम्। बालकाण्डीयवचनस्य केनापि प्रक्षिप्तत्वात्। तद्रीत्या तु विष्णुदेहविलोप एव स्यात्। न च सीता लक्ष्मीरिति वचनमपि वेदवत्याः कथाया उत्तरकाव्ये ग्रथिताया विरुद्धमितिवाच्यम्। उत्तरकाव्यस्याप्रामाणिकत्वात्।

उपास्यं तु ब्रह्मैव। तद्रामरूपं वा स्यादन्यद्वा स्यात्। यस्य ध्यानेनोपासनेन च मनोवृत्तयः सुस्थिरा भवेयुस्तस्यैव ध्यानं कर्तव्यम्। ब्रह्मणो व्यापकत्वात्सर्व-मयत्वाद्यत्र कुत्रापि शुचिनि वस्तुनि वा मनःसंशोधन-समर्थे पुरुषे वा पावित्र्यप्रापिकायां स्त्रियां वा ध्यानं न दोषाय। अत एव कश्चित्कृष्णमुपास्ते कश्चिच्छिवं कश्चिन्नारायणं कश्चिद्ब्रह्मानुं कश्चिदन्यमपि। एवं कश्चिद्गौरीं कश्चिद्दुर्गां कश्चिदन्यामपि स्वशिवायो-पास्ते कालिकादिकाम्। विभिन्नरुचिर्हि लोकः। यद्रूपं यच्च चरितं यस्मै रोचते तद्रूपं तच्चरितं च स स्वहृदये निदधान आत्मनो मानुषं जन्म कार्तार्थ्यं गमयति। श्रीरामस्तु परममधुरः। तत एव बहूनामुपासकाना-मात्मकल्याणाभिलाषिणां बलादपि तवैवोपास्यत्वबुद्धिः ॥३।२।१४॥

इति तृतीयाध्याये द्वितीयः पादः

●

तृतीयाध्यायः समाप्तः

★

अथ चतुर्थेऽध्याये प्रथमः पादः

अथ प्रमाणानि ॥४।१।१॥

प्रमा यथार्थज्ञानम्। यथावस्थितव्यवहारानुगुणज्ञानं वा। प्रमाकरणं प्रमाणम्। प्रमेयसिद्धिर्हि प्रमाणाधीना। योर्थस्तत्त्वतः प्रमीयते तत्प्रमेयम्। ततः प्रमेयानि परलोकोपयोगीनि प्रायेण निरूप्येदानीं प्रमाणानि निरूप्यन्ते ॥४।१।१॥

प्रमाकरणं प्रमाणम् ॥४।१।२॥

प्रमा यथार्थज्ञानम्। यदर्थविज्ञानं सा प्रमेति-वात्स्यायनः। सा च द्रव्यादिविषयं ज्ञानमितिप्रशस्त-पादाचार्याः। यथार्थानुभवो वा। याथार्थ्यं च तद्वति तदवगाहित्वमितिन्यायमञ्जरी। "यथार्थानुभवो मान-मनपेक्षतयेष्यते" इति कुसुमाञ्जलावुदयनाचार्याः। अत्र मानशब्दार्थः प्रमा। "क्रियायाः परिनिष्पत्तिर्य-द्व्यापारादनन्तरम्। विवक्ष्यते यदा यत्र कारणं तत्तदा स्मृतम्॥" इति करणस्वरूपम्। वैयाकरणास्तु स्वव्याप्येतरयावत्कारणसमवधाने सति यदव्यवहितो-त्तरक्षणे फलनिष्पत्तिस्तत्करणमित्याहुः। फलायोगव्य-वच्छिन्नं फलोपधायकं वा कारणमेव कारणमिति शब्दशक्तिप्रकाशिका। तथा च यथार्थज्ञानस्य यत्करणं तदेव प्रमाणम्। चिदचिद्ब्रह्मेति तत्त्वत्रयम्। तत्त्वं हि प्रामाणिकं वस्तु ॥४।१।२॥

द्रव्याद्रव्यविभागेन पदार्थावस्थितिः ॥४।१।३॥

इमानि द्रव्याण्यद्रव्याणीमानीतिविभागेन पदार्था-नामवस्थितिरास्थेया ॥४।१।३॥

द्रव्याण्याह—

अव्यक्तकालजीवेश्वरनित्यविभूतिधर्मभूतज्ञानानि षड्द्रव्याणि ॥४।१।४॥

गुणाश्रयो द्रव्यमिति सामान्यलक्षणं द्रव्यस्य। अव-स्थाश्रयो वा तत्। अव्यक्तं प्रकृतिः। इयमेव बद्धचेत-नानां ज्ञानानन्दादींस्तिरोदधाति। विपरीतज्ञानं च जन-यति इयमेवेश्वरस्य क्रीडास्थली क्रीडासाधनं च। कालो गुणत्रयरहितो जडद्रव्यविशेषः। स च नित्यो विभुश्च। वर्तमानभूतभविष्यद्भेदेन त्रिविधः। युगपदचिरनिरादिव्य-पदेशहेतुः कालवाचकनिमेषादिवक्षणसमासत्वयनसंवत्स-रादिव्यवहारहेतुश्च। जीवेश्वरौ पूर्वं तत्तत्प्रकरणे निरू-पितौ। नित्यविभूतिः शुद्धसत्त्वम्। तच्च जडमिति केचित्। अजडमिति बहवः। धर्मभूतज्ञानं च स्वयंप्रका-शाचेतनद्रव्यत्वे सति विषयित्वम्। विषयोस्त्यस्य स्वनि-ष्ठविषयतानिरूपितविषयितावत्त्वसम्बन्धेनेति व्युत्पत्ति-र्विषयित्वस्य। तच्च विभु। द्रव्यगुणोभयात्मकत्वं च तस्य प्रभावात्। तदीश्वरस्य नित्यानां च जीवानां च सर्वदा नित्यम्। बद्धजीवानां तु तत्तिरोहितमेव। पात्र-त्वाभावात्। मुक्तावस्थायां च तदाविर्भवति। ज्ञानस्य नित्यत्वे तदुत्पन्नं विनष्टं वेतिव्यवहारे तस्य संकोच-विकासौ कारणम्। ज्ञाननित्यत्वे क्षणिकत्वादिपक्षा निराकृता वेदितव्याः। ज्ञानस्य द्रव्यत्वमवस्थाश्रयत्वात्। अवस्थाश्रयत्वमेव द्रव्यत्वम्। तस्य गुणत्वमपि। अद्रव्य-मेव गुण इति नात्राग्रहः ॥४।१।४॥

प्रमाणानि त्रीण्येव ॥४।१।५॥

प्रमाणानि त्रीण्येवात्राभिमतानि। तानि च प्रत्यक्षा-नुमानशब्दरूपाणि। यच्च स्वयंसिद्धिस्तथा दिव्यं प्रत्यक्ष-मनुमागमः। पञ्च सन्ति प्रमाणानीति प्रज्ञापरित्राणे प्रोक्तम् चत्वारीत्यप्यन्यज्ञा ॥४।१।५॥

साक्षात्कारिप्रमाकरणं प्रत्यक्षम् ॥४।१।६॥

साक्षात्कारिणी या प्रमा तस्याः करणं प्रत्यक्षम्। इन्द्रियजन्या प्रमा साक्षात्कारिणीति केचित्। तन्न।

मुक्तनित्येश्वरज्ञानेऽव्याप्तेः। इन्द्रियनिरपेक्षत्वं तस्य। साक्षात्त्वं च लैङ्गिकत्वशाब्दत्वस्मृतित्वरहितं ज्ञानत्वम् ॥४।१।६॥

स्मृतिः प्रत्यभिज्ञा चान्तर्भूता ॥४।१।७॥

सदृशादृष्टचिन्ताद्यैः संस्कारानुग्रहे ततः संस्कारबोधे या परिणमति मतिः सा स्मृतिः। पूर्वानुभवजन्यसंस्कारमात्रजन्यं ज्ञानं स्मृतिरित्यपि सिद्धान्तः। पूर्वा स्मृतिर्विवृतिं नेयं व्यभिचरति। सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधका इतिरीत्या स्मृतिः क्वचित्सदृशदर्शनाद्भवति। क्वचिद्दृष्टवशात्। क्वचिच्चिन्तया चापि। प्रत्यभिज्ञा च प्रतिगता अभिज्ञामिति। इन्द्रियसहकृतसंस्कारजन्यज्ञानत्वं तल्लक्षणम्। स एवायं घटो यो मया पूर्वमुपलब्ध इत्याकारिका पूर्वावस्थानुभवजनितसंस्कारसहकृतेन्द्रियप्रभवा इत्यपि तत्स्वरूपम्। स्मृतिः प्रत्यभिज्ञा चापि प्रत्यक्षान्तर्भूते ॥४।१।७॥

अभावस्यापि प्रत्यक्षत्वम् ॥४।१।८॥

भूतले घटात्यन्ताभावो भूतलमेव। घटाप्रागभावो मृदेव। घटध्वंसश्च कपालमेवेति सर्वमभावस्य भावान्तररूपत्वात्परिगृह्यते। एवं चाभावज्ञानस्यापि प्रत्यक्षेऽन्तर्भावः ॥४।१।८॥

सर्वं विज्ञानं यथार्थम् ॥४।१।९॥

स्वसदृशे वस्तुनि स्वस्यांशतो विद्यमानत्वादिति भावः ॥४।१।९॥

भ्रमादिप्रत्यक्षज्ञानमपि तथा ॥४।१।१०॥

सत्ख्यातिस्वीकारादिति। सत्ख्यातिस्तु ज्ञानविषस्य सत्यत्वम्। भ्रमत्वं तु विषयव्यवहारबाधात्। एतत्तु पञ्चीकरणप्रक्रियया वेदितव्यम्। सा प्रक्रिया तु गुरुजनशरणागतिस्वीकारेण वेद्या। सामान्येनात्र लिख्यते। पृथिव्यादीनां सर्वेषां तत्त्वानां प्रथममर्धार्धभागः कर्तव्यः। एकोर्धभागः पृथक् स्थापनीयः। ततः सर्वेषामर्धभागानामवशिष्टानां चत्वारो भागाः कल्पनीयाः। प्रत्येक चतुर्थो भागस्तत्तदर्धभागेषु स्थापनीयः। एवं चार्धभागः पृथिव्याः एको भागो गणनीयः। जलतेजोवाय्वाकाशानां चतुर्थो भागः पृथिव्या एकस्मिन् भागे मेलनीयः। एवं च पञ्च भागाः सम्पन्नाः। एतदेव पञ्चीकरणम्। एषा मानवकल्पना। भगवान् कथं जगन्निर्मातीति तु मानवानां सर्वथाकलनीयमेवेति। एतया पञ्चीकरणप्रक्रियया परिज्ञातं भवति सर्वेषु पृथिव्यादितत्त्वेषु सर्वेषां पृथिव्यादीनां भागः एवं रजतभ्रमस्थले शुक्त्यादौ पूर्वत एव रजतांशस्य स्वीकारे रजतज्ञानं शुक्तौ न भ्रमः। एषैव सत्ख्यातिः। सा च विशिष्टाद्वैतवादिनां सर्वथैव स्वीकृता। भूतेष्वाकाशोऽवकाशहेतुः। वायुर्बहनादिहेतुः। तेजः पचनादिहेतुः। जलं सेचनपिण्डीकरणादिहेतुः। पृथिवी धारणादिहेतुरितितत्त्वत्रये ॥४।१।१०॥

सर्वं ज्ञानं सत्यं सविशेषविषयं च ॥४।१।११॥

सर्वं ज्ञानं सत्यं सविशेषविषयं च। निर्विशेषस्य कथमपि ज्ञानस्यासंभव एव। वैशिष्ट्यानवगाहिज्ञानस्य दुर्लभत्वात्। ज्ञानमात्रस्य सविषयकत्वेन सर्वं ज्ञानं सविशेषविषयमित्युक्तम् ॥४।१।११॥

प्रत्यक्षं द्विविधं निर्विकल्पकं सविकल्पकं च ॥४।१।१२॥

स्पष्टम् ॥४।१।१२॥

गुणसंस्थानादिविशिष्टप्रथमपिण्डग्रहणं प्रथमम् ॥४।१।१३॥

प्रथमं निर्विकल्पकम्। निर्विकल्पके प्रत्यक्षेपि ससंस्थानमेव वस्त्वित्थमिति प्रतीयते। संस्कारनिरपेक्षकेवलेन्द्रियजं ज्ञानं निर्विकल्पकम् ॥४।१।१३॥

द्वितीयादिप्रत्ययसमूहः सविकल्पकः ॥४।१।१४॥

संस्थानरूपप्रकाराख्यस्य पदार्थस्यानेकवस्तुनिष्ठतयाऽनेकवस्तुविशेषणत्वं द्वितीयादिप्रत्ययावगम्यमिति द्वितीयादि प्रत्ययाः सविकल्पका इत्युच्यन्ते। द्वितीयादित्वेन यद्द्वितीयादिपिण्डग्रहणं तदेव सविकल्पकमित्याशयः। सप्रत्यवमर्शं गुणसंस्थानादिविशिष्टद्वितीयादिपिण्डज्ञानं सविकल्पकमित्यर्थः। संस्कारोद्बोधसहकृतेन्द्रियजन्यं ज्ञानं सविकल्पकमितिभावः। संस्कारसहकृतेन्द्रियजन्यतया सप्रत्यवमर्शं ज्ञानं सविकल्पकमिति तत्त्वार्थः। प्रत्यवमर्शस्तत्तोल्लेख इति न्यायपरिशुद्धिः ॥४।१।१४॥

उभयमपि द्विविधमर्वाचीनमनर्वाचीनं च ॥४।१।१५॥

युगपदशेषविषयसाक्षात्कारक्षममनर्वाचीनम्। तद्योगिमुक्तेश्वरादि-प्रभावविशेषाधीनम्। अनर्वाचीनाद्भिन्नमस्मदादिज्ञानमर्वाचीनम् ॥४।१।१५॥

अर्वाचीनं द्विविधमिन्द्रियसापेक्षं तदनपेक्षं च ॥४।१।१६॥

अर्वाचीनमुक्तम्। तद्द्विविधम्। इन्द्रियसापेक्षमिन्द्रियानपेक्षं च ॥४।१।१६॥

इन्द्रियानपेक्षं द्विविधं स्वयंसिद्धं दिव्यं च ॥४।१।१७॥

स्पष्टम् ॥४।१।१७॥

स्वयंसिद्धं योगजन्यम् ॥४।१।१८॥

स्पष्टम् ॥४।१।१८॥

दिव्यं भगवत्प्रसादजन्यम् ॥४।१।१९॥

स्पष्टम् ॥४।१।१९॥

अनर्वाचीनं त्विन्द्रियनिरपेक्षं मुक्तानिरपेक्ष्वरज्ञानम् ॥४।१।२०॥

स्पष्टम् ॥४।१।२०॥

इति चतुर्थाध्याये प्रथमः पादः

★

अथ चतुर्थाध्याये द्वितीयः पादः

अथानुमानम् ॥४।२।१॥

अथ प्रत्यक्षनिरूपणानन्तरमनुमानं निरूप्यते। अनुमानं पश्चान्मानम्। कस्मात्पश्चात्? प्रत्यक्षप्रमाणादिति ॥४।२।१॥

अनुमितिकरणमनुमानम् ॥४।२।२॥

अनुमानस्य प्रत्यक्षाधीनत्वात्प्रथमं प्रत्यक्षं निरूप्येदानीमनुमानं निरूप्यते। अनुमितिकरणमिति। व्याप्यस्य व्याप्यत्वानुसन्धानाद्व्यापकविशेषप्रमितिरनुमानमिति वा। अत्र प्रमितिपदं ज्ञानसामान्यपरं न तु यथार्थज्ञानपरम्। तस्य प्रमाणत्वं तु करणदोषबाधकप्रत्ययरहितत्वात्। अनधिकदेशकालनियमं व्याप्यम्। अन्यूनदेशकालवृत्ति व्यापकम्। नियमशब्दोत्र वृत्तितारूपसम्बन्धपरः ॥४।२।२॥

तेन निरुपाधिकतया नियतसम्बन्धो व्याप्तिः ॥४।२।३॥

तेन व्यापकेन नियतः सम्बन्धो व्याप्यस्य सामानाधिकरण्यमित्यर्थः। निरुपाधिकत्वमुपाधिज्ञानरहित्वम्। तेनोपाधिज्ञानाभावेन सहितं नियतसामानाधिकरण्यज्ञानमेवानुमापकम्। तेन व्यापकेनेत्यत्र सहयुक्तेऽप्रधाने तृतीया। सेयं व्याप्तिर्भूयोदर्शनावसेयेति वरदविष्णुमिश्राः ॥४।२।३॥

व्याप्तिर्द्विधान्वयव्यतिरेकभेदात् ॥४।२।४॥

साधनविधौ साध्यविधिरूपेण प्रवृत्ता व्याप्तिरन्वयव्याप्तिः। यथा यो यो धूमवान्सोग्निमानिति। साध्यनिषेधे साधननिषेधरूपेण प्रवृत्ता व्याप्तिर्व्यतिरेकव्याप्तिः। यथा योनग्निः स निर्धूम इति ॥४।२।४॥

उभयी व्याप्तिरुपाधिसम्भवे दुष्यति ॥४।२।५॥

उभयविधापि व्याप्तिरुपाधिसम्भवे दुष्यति। उपाधिश्च साधनाव्यापकत्वे सति साध्यसमव्याप्तः साधनधर्मव्यतिरिक्तो धर्मः। अनित्यत्वरूपसाध्यसमव्याप्त-

स्यापि कृतकत्वस्य सावयवत्वरूपसाधनव्यापकत्वात्तत्र नातिव्याप्तिः । साधनाव्यापकपदेन तद्व्यावृत्तिः । कृतकत्वबति निरवयवे रूपादावनित्ये सावयवत्वस्याभावान्न साध्यव्याप्तिरिति साध्यसमव्याप्तपदेन तद्व्यावृत्तिः । कृतकत्वादनित्यत्वसाधने कृतकत्वस्य द्रव्यत्वात्संयोगित्वसाधने द्रव्यत्वस्य वा साधनस्य स्वाव्यापकत्वादभेदे व्याप्यव्यापकभावानङ्गीकारात्समव्याप्तत्वाच्चोपाधित्वं स्यादिति तद्व्यावृत्त्यर्थं साधनधर्मव्यतिरिक्तपदम् । साधनरूपो यो धर्मस्तद्भिन्नत्वं साधनान्यत्वमिति तदर्थः । एवं च सावयवत्वादनित्यत्वसाधने कृतकत्वस्य, कृतकत्वादनित्यत्वसाधने सावयवत्वस्य, समव्याप्तहेतुप्रयोगे तत्स्वरूपस्य चोपाधित्वव्युदासाय विशेषणत्रयम् । पक्षेतरत्वादेरुपाधित्वव्युदासाय समशब्दः । इतरथा साध्यव्यापक इत्येतावता सावयवत्वादेरुपाधित्वव्युदासः शक्यः । यावत्साधनदेशमवर्तमानो यावत्साध्यदेशवर्तीत्युपाधिर्वा । हेतुसद्भावे साध्यसद्भावोन्वयः । साध्याभावे साधनाभावो व्यतिरेक इति स्पष्टार्थः ॥४।२।५॥

उपाधिर्द्विविधो निश्चितः शङ्कितश्च ॥४।२।६॥

व्याप्तः पक्षे नास्तीत्यवधारितो निश्चितोपाधिः । यथा "विप्रतिपन्ना सेवा दुःखहेतुः सेवात्वात्, राजसेववत्" इत्यनुमाने पापारब्धत्वं निश्चितोपाधिः । अयमीश्वरसेवायां नास्तीति शास्त्रतो निश्चितत्वाद् व्याप्तत्वाच्च निश्चितोपाधिः । पक्षावृत्तिव्याप्त्योरन्यतरस्यापि सन्देहे शङ्कितोपाधिः । यथा विप्रतिपन्नो जीव एतच्छरीरावसाने मुक्तिमान् निष्पन्नसमाधित्वाच्छुकादिवत् । अत्र कर्मात्यन्तपरिक्षय उपाधिः । स च निष्पन्नसमाधौ विप्रतिपन्ने जीवेस्ति नास्ति वेति सन्दिग्धत्वाच्छङ्कितोपाधिः । उप समीपे स्थिते स्वगतो धर्मो येनाधीयते स उपाधिः । साधने सोपाधिः साध्ये निरूपाधिरेवोपाधित्वेन निश्चेयः ॥४।२।६॥

व्याप्यं साधनं लिङ्गमित्यनर्थान्तरम् ॥४।२।७॥

अनर्थान्तरमित्यस्यैकार्थकमित्यर्थः । निरुपाधिकसम्बन्धं व्याप्यं साधनमित्यनर्थान्तरमिति न्यायपरिशुद्धौ ॥४।२।७॥

तस्य द्वे रूपे अनुमित्यङ्गभूते ॥४।२।८॥

तस्यानुमानस्येत्यर्थः ॥४।२।८॥

रूपद्वयमेवाह—

व्याप्तिः पक्षधर्मता च ॥४।२।९॥

व्याप्तिरुक्ता । पक्षतात्रयवृत्तित्वं पक्षधर्मता । यथा पर्वते धूमेन वह्नौ साध्ये वह्निव्याप्यधूमवान् पर्वत इत्यत्र धूमस्य पक्षधर्मता ॥४।२।९॥

तयोरेव पञ्च रूपाणि ॥४।२।१०॥

कानि तानीत्याह—

पक्षव्यापकत्वं सपक्षे सत्त्वं विपक्षवृत्तिरहितत्वमबाधितविषयत्वमसत्प्रतिपक्षं चेति ॥४।२।११॥

सिषाधयिषितधर्मविशिष्टो धर्मी पक्षः । यथाग्निमत्त्वादिसाधने पर्वतादिः । तस्मिन्नभिन्नप्रकारेण स्वायोगव्यवच्छेदेन सर्वत्र वर्तमानत्वं पक्षव्यापकत्वम् । अभिन्नप्रकारत्वं च कदाचिद्धेतुवृत्तितायां साध्यानुमितौ योवच्छेदकत्वेनाभिमतस्तद्भिन्नावच्छेदकरहित्वम् । सिषाधयिषितधर्मसजातीयधर्मवान् सपक्षः । यथा महानसादिः । तस्मिन्सर्वत्र कतिपयव्यक्तौ वा वृत्ति सपक्षे सत्त्वम्-सर्वसपक्षावृत्तिराहित्यमित्यर्थः । उभययोगापेक्षासाध्यतज्जातीयशून्यो विपक्षः । यथा महाह्रदादिः । तत्र सर्वत्रावृत्तिपक्षरहितत्वम् । प्रबलेन प्रमाणेन पक्षे निश्चितसाध्याभाववत्त्वं बाधितविषयत्वम् । यथा महाह्रदोग्निमानित्यादि । तदभावो बाधितविषयत्वम् । यथा पर्वतः परभागेग्निमानित्यादौ । समबलतया प्रतीयमानप्रमाणोपरोधाभावोसत्प्रतिपक्षत्वम् । यथा धूमानुमानादेः । ॥४।२।११॥

व्याप्यं द्विविधम् । अन्यव्यतिरेकिकेवलान्वयिभेदात् ॥४।२।१२॥

वैशेषिकोक्त-त्रिधाविभागनिराकरणाय स्वाभिमतविभागमाह व्याप्यं द्विविधमिति । ननु न द्विविधं व्याप्यं केवलव्यतिरेकिणोपि भावात् । सिद्धान्ते प्रायेणास्वीकारात्तस्य ॥४।२।१२॥

पञ्चरूपोपपन्नं व्याप्यमन्वयव्यतिरेकि ॥४।२।१३॥

पक्षसत्त्वसपक्षसत्त्वादीनि पञ्च रूपाण्युक्तानि । तैरुपपन्नं व्याप्यमन्वयतिरेकि । यथा पर्वतोग्निमान्

धूमवत्त्वात् । यो यो धूमवान्सोग्निमान् । यथा महानसम् । योनग्निः स निर्धूमः । यथा महाह्रदः ॥४।२।१३॥

तादृशमेव विपक्षरहितं व्याप्यं केवलान्वयि ॥४।२।१४॥

यथा ब्रह्म शब्दवाच्यं वस्तुत्वाद् द्रव्यत्वाद्वा घटादिवत् । अनुभूतिरनुभाव्या वस्तुत्वाद्घटादिवदित्यादि । न ह्यवाच्यमनुभाव्यमिति वा किञ्चिदस्ति येन विपक्षः स्यात् । यस्य केवलान्वयिनो हेतोः साध्यविपर्ययो व्याहतो भवति स प्रमाणम् । यथा ब्रह्म शब्दवाच्यं वस्तुत्वाद् द्रव्यत्वाद्वा घटादिवत् । यस्य तु साध्यविपर्ययो न व्याहतः स न प्रमाणम् । यथाग्निरनुष्णः पदार्थत्वात् । धर्मादयः कस्यचिदिन्द्रियग्राह्याः प्रमेयत्वादित्यादि । तत्र साध्यविपर्यये व्याघाताभावादित्यर्थः ॥४।२।१४॥

न केवलव्यतिरेकिण्याग्रहः ॥४।२।१५॥

केवलव्यतिरेकिण्याग्रहो नास्ति । तत्र साध्याप्रसिद्धेस्तद्व्यतिरेकव्याप्तिर्दुर्ग्रहा । अतः केवलव्यतिरेकिनिरासः ॥ ।२।१५॥

अनुमानं द्विविधं स्वार्थं परार्थं चेति केचित् ॥४।२।१६॥

केचिदित्यनेन परार्थानुमाने सर्वेषां मतिमतां नादर इति सूचितं भवति । सर्वेषामनुमानानां स्वप्रतिसन्धानादिवलेन प्रवृत्ततया स्वव्यवहारमात्रहेतुत्वमिति स्वार्थानुमानमेवेत्याग्रहः ॥४।२।१६॥

तमेवाग्रहं स्पष्टयति—

स्वार्थानुमानमेव ॥४।२।१७॥

एवकारः परार्थं व्यवयति । तथाहि–परार्थमित्यत्र परस्यार्थः प्रयोजनं यस्येति बहुव्रीहिर्वा परस्मै इति परार्थमिति तत्पुरुषो वा स्यादुभयथापि परव्याप्त्यादिजन्यत्वं परव्यवहारे हेतुत्वं वोक्तं स्यात् । तत्र नाद्यः । स्वप्रतिसन्धानादिवलेन प्रवृत्ततयेत्युक्तम् । प्रतिसन्धानं व्याप्तिस्मृतिः । आदिपदेन च पक्षधर्मताज्ञानं गृह्यते । बलशब्दस्तन्निष्ठकारणतापर्यायशक्तिपरः । नान्त्यः । स्वव्यहारमात्रहेतुत्वेनेत्युक्तत्वात् ॥४।२।१७॥

अनुमानोपयोगिनः पञ्चावयवानाह—

प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पञ्चावयवाः ॥४।२।१८॥

परं प्रति किञ्चित् प्रतिपिपादयिषितं पक्षवचनं प्रतिज्ञा । यथा पर्वतो वह्निमान् । साध्यधर्मविशिष्टधर्मिप्रतिपादकविभक्तिपदान्तरसमभिव्याहारि[1]शब्दरूपं लिङ्गस्य वचनं हेतुः । यथा धूमवत्त्वात् । साध्यसाधननिर्देशपूर्वकदृष्टान्तवचनमुदाहरणम् । तद्द्विधा । अन्वयोदाहरणं व्यतिरेकोदाहरणं चेति । यो धूमवान् सोग्निमान् यथा महाननम् इत्यन्वयोदाहरणम् । योनग्निः स निर्धूमः । यथा महाह्रदः इति व्यतिरेकोदाहरणम् । दृष्टान्तनिदर्शनेन व्याप्ततया पक्षे हेतूपसंहारद्वारायपूपनयः । सोपि पूर्ववद्द्विविधः । अयं च तथा धूमवानित्यन्वयोपनयः । अयं न तथा निर्धूम इति व्यतिरेकोपनयः । हेतुपूर्वं पक्षे साध्यमुपसंहारद्वारं निगमनम् । तदपि पूर्वतुल्यन्यायतया द्वैविध्यम् । यथा तस्मादनाग्निमानिति । अयं निरग्निर्न भवतीति च । अत्रावयवप्रयोगे मतद्वैविध्यम् । विशिष्टाद्वैतवादिनां त्वनियमः । क्वचित्पञ्चावयवाः । क्वचित्त्रयोवयवाः । क्वचिदवयवकलनाराहित्यम् इत्यादि । अनियतावयवाङ्गीकरणं वादिनोः परस्परसंवादानुरूपम् । शिष्याणां शिष्यविभागयैवोत्तरं देयमितिन्यायात् । उपपन्नञ्च मृदुमध्यकठोरधियामर्थात् मन्दमध्यतीक्ष्णधियां विस्तरसंग्रहाभ्यां व्यवहारः । मन्दबुद्धीनां पञ्चावयवप्रयोगरूपातिविस्तरः । मध्यधियां त्र्यवयवप्रयोगरूपं विस्तरमात्रम् । तीक्ष्णबुद्धीनां तु अवयवद्वयप्रयोगरूपसंग्रहः ॥४।२।१८॥

अवयवसंयुक्तः सद्धेतुरेव साध्यसाधकः ॥४।२।१९॥

सद्धेतुरित्युक्त्या धूमसदृशधूलीपटलान्न वह्न्यनुमितिः ॥४।२।१९॥

अथ कथा वादजल्पवितण्डाख्याः ॥४।२।२०॥

वादो जल्पो वितण्डा चेति तिस्रः कथा भवन्ति । विचारविषयगोचरो वादिप्रतिवादिवाक्यसन्ततिविशेषः कथा । वाक्यसन्ततौ विशेषश्च प्रमाणतर्कोपन्यासात्मकत्वम् ॥४।२।२०॥

वादः ॥४।२।२१॥

प्रमाणतर्काभिमानास्पदसाधननिश्चितार्थविषयो व्यवहारो वादः । तत्र स्वपक्षस्थापनं परपक्षदूषणमित्यवयवद्वयम् । प्रमाणतर्कसाधनोपालम्भः सिद्धान्ताविरुद्धः पञ्चावयवोपपन्नः पक्षप्रतिपक्षपरिग्रहो वाद इति गौत-

मसूत्रम्। वादे तावत् कथा तत्त्वनिर्णयपर्यन्ता वा स्यादजातिनिग्रहपर्यन्ता वा। तदेवाह प्रज्ञापरित्राणे—

निग्रहस्थानपर्यन्ता विजिगीषुकथा मता।
तत्त्वनिर्णयपर्यन्ता वादः स्याच्च पुनः पुनः ॥ इति।

अत्र बुद्धिपूर्वकदुष्टवचनानि न संभवन्ति। अन्यानि तदुद्भाविनान्यभ्युपगन्तव्यानि भवन्ति। तत्त्वनिर्णयाय प्रवृत्तत्वात्। वादे सभ्यादिसंवरणनिर्बन्धो नास्ति। अपलापादीनां प्रायशस्तत्राभावात्। वीतरागाः शिष्यगुरुसब्रह्मचारिशिष्टश्रोत्रियश्रेयोर्थिनो हि तदधिकारिणः। सभ्यानां दैवादागतानां त्ववर्जनम्। अत्र सभापतिवरणमनपेक्षितम्। विजयरूपफलप्रतिपादनमेव तस्य फलम्। न वादो विजयार्थः। "तं शिष्यगुरुसब्रह्मचारिविशिष्टश्रेयोर्थिभिरनसूयुभिरभ्युपेयादि"ति गौतमसूत्रम्। तं संवादम्। शिष्टलक्षणं मनुस्मृतौ—

धर्मेणाधिगतो यैस्तु वेदः सपरिबृंहणः।
ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः ॥ इति।

वेदस्यैकां शाखामधीयानः श्रोत्रियः। श्रेयोर्थिनः शास्त्रार्थजन्यफलार्थिनः। शिष्यगुरुभ्यां क्रियमाणस्य वादस्य शिष्यगतं ज्ञान फलम्। सब्रह्मचारिभ्यां कृतस्य तस्य तज्ज्ञानस्थिरीकरणमुभयगतं प्रयोजनम्। शिष्टश्रोत्रियश्रेयोर्थिभ्यां क्रियमाणस्य तत्त्वसंशयनिवर्तनमुभयगतं प्रयोजनमिति श्रीनिवासाचार्याः ॥४।२।२१॥

उभयपक्षोपन्यासतत्प्रतिक्षेपवती कथा जल्पः ॥४।२।२२॥

नानाप्रवक्तृके विचारे सति तद्विचारवस्तु विचार विषयासन्दृब्धिः कथेति न्यायतात्पर्यटीका। उभयेषां पक्षाणां न्यासः स्थापनम्। तत्प्रतिक्षेपः खण्डनम्। तद्वती कथा जल्प इत्युच्यते। विजिगीषुकथायां गत्यन्तरमलभमानस्य परव्यामोहनेनापि पाक्षिकविजयः समत्वं वा सम्भवेदिति-बुद्धिपूर्वकदुष्टप्रयोगसम्भवः। दुष्टप्रयोग एव जल्पः। यथोक्तोपपन्नश्छलजातिनिग्रहस्थानं साधनोपालम्भो जल्प इति न्यायदर्शने ॥४।२।२२॥

वादिपक्षोपन्यासतत्प्रतिक्षेपमात्रं वितण्डा ॥४।२।२३॥

वादिपक्षोपन्यासस्तत्प्रतिक्षेपमात्रं च यत्र सा वितण्डा। अत्र जल्पव्यावर्तनाय मात्रपदम्। धर्मात्मभिः सत्यसेविभिर्न जल्प आश्रयणीयो न च वितण्डेति। सत्यमेव निर्णयम्। "विप्रं निर्जित्य वादतः" "न विगृह्य कथां कुर्यात्" इत्यादिभिर्जल्पवितण्डयोर्निषेधोपि शिष्टविषय इति वेदान्ताचार्याः। "तत्त्वावध्यवसायसंरक्षणार्थं जल्पवितण्डे वीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत्" इति गौतमः। वीतरागस्य तु न वैतण्डिकत्वम्। यावत्परमतं न निराक्रियते तावत्स्वमतमप्रतिष्ठितं भवतीति स्वमतस्थापने तस्याग्रहः। "स प्रतिपक्षस्थापनाहीनो वितण्डा" इति न्यायदर्शनम्। स्वपक्षस्थापनाहीनः परपक्षखण्डनमात्रपरः स जल्प एव वितण्डेत्युच्यत इति प्रसन्नपदा ॥४।२।२३॥

कथाङ्गानि चत्वार्येव ॥४।२।२४॥

चत्वार्येव कथाङ्गानि। एवेति निर्धारणे ॥४।२।२४॥ कानि तानीत्याह—

सभ्यानुविधेयसंवरणं वादिप्रतिवादिनियमः कथाविशेषव्यवस्था निरूप्यनिर्णयश्चेति ॥४।२।२५॥

अनु पश्चाद्वादसमाप्तौ विधेयं कर्तव्यं जयपराजयफलं यस्येत्यनुविधेयशब्देन सभापतिर्विवक्षितः। एते सभ्याः, सभापतिरयमिति सम्यग्वरणम्। वादिप्रतिवादिनियमस्तु अयमस्य प्रमेयस्य साधको वादी, अयं तु तद्दूषकः प्रतिवादीतिव्यवस्था। कथाविशेषव्यवस्था वादजल्पवितण्डानामन्यतमपरिग्रहः। निरूप्यस्य निर्धारणं निरूप्यनिर्णयः। निरूप्यनिर्णय एव सिद्धान्तनियमस्यान्तर्भावात्तस्यानुक्तिः। यत्र तु नानासिद्धान्तानुमतोर्थो निरूप्यते तत्र व्यवहारविशेषनियमार्थं सिद्धान्तविशेषनियमोप्यस्तु ॥४।२।२५॥

अथ हेत्वाभासाः ॥४।२।२६॥

अनुमानप्रसङ्गे तदङ्गतया हेत्वाभासा उच्यन्ते। अहेतवोपि हेतुवद्भासमाना हेत्वाभासाः। अप्रमाणत्वे सति प्रमाणव्यवहारविषयास्ते। यद्विषयकत्वेन ज्ञानस्यानुमितिविरोधित्वं तत्त्वं हेत्वाभासत्वम्। प्रमाणचातुर्विध्यात्तदाभासा अपि चतुर्विधाः। तथा हि प्रत्यक्षप्रमाणभिन्नत्वे सति प्रत्यक्षव्यवहारविषयाः प्रत्यक्षाभासाः। अनुमानप्रमाणभिन्नत्वे सत्यनुमानव्यवहारविषया अनुमानाभासाः। आगमप्रमाणभिन्नत्वे सत्यागमव्यवहार-

विषया आगमाभासाः। आगमः शब्दः। स्मृतिप्रमाणभिन्नत्वे सति स्मृतिव्यवहारविषयाः स्मृत्याभासाः। प्रत्यक्षाभासो यथा—द्वौ चन्द्रमसौ। पीतः शङ्ख इत्यादि। अनुमानाभासो यथा—वाष्पादिषु धूमत्वाद्यारोपेण धूमवत्त्वात्पर्वतो वह्निमानिति। एवमागमाभासस्मृत्याभासयोरप्युदाहरणानि कल्पनीयानि। एषामुद्भवस्तु विषयेन्द्रियदोषात् ॥४।२।२६॥

नामग्राहं परिगणयति—

असिद्ध-विरुद्धा-नैकान्तिक-प्रकरणसमकालात्ययापदिष्टाः ॥४।२।२७॥

असिद्धो विरुद्धोऽनैकान्तिकः प्रकरणसमः कालात्ययापदिष्टश्चेति पञ्च हेत्वाभासाः। असिद्धानैकान्तिकविरुद्धा हेत्वाभासा इति न्यायतत्त्वकाराः। परं कालात्ययापदिष्ट-प्रकरणसमावपि तेषामिष्टावेव। अनैकान्तिक एव सव्यभिचार इति प्रकरणसम एव सत्प्रतिपक्ष इत्यन्यत्र ग्रन्थकारैर्व्यवहृतम्। सत्प्रतिपक्षश्च साध्याभावसाधकं हेत्वन्तरं यस्य तथाभूतः। यथा शब्दो नित्यः श्रवणत्वात् ॥४।२।२७॥

असिद्धं लक्षयति—

असिद्धो व्याप्तिपक्षवृत्तिनिश्चयरहितः ।४।२।२८।

अत एव सोपक्षधर्मः। स्पष्टम् ॥४।२।२८॥

स त्रिविधः स्वरूपासिद्ध आश्रयासिद्धो व्याप्यत्वासिद्धश्चेति ॥४।२।२९॥

पक्षधर्मताया अभावेन स्वरूपासिद्धो हेत्वाभासः। यथा जीवोऽनित्यः, चाक्षुषत्वात्, घटवत्। अथवा शब्दो नित्यो निरंशत्वादिति स्वरूपासिद्धः।

आश्रयासिद्धो यथा, व्योमारविन्दं सुरभि, अरविन्दत्वात्, सरोजारविन्दवत्। अत्र व्योमारविन्दमाश्रयः। स चासिद्धः, शशशृङ्गं तीक्ष्णम्, अत्रापि पक्षधर्मताया अभाव एव हेतुः। असिद्धत्वं च लिङ्गत्वेनानिश्चितत्वम्।

व्याप्यत्वासिद्धो द्विविधः—व्याप्तिग्राहकप्रमाणाभावादेकः। यथा यत् सत् तत् क्षणिकमिति। क्षणिकत्वसत्त्वयोर्व्याप्तिग्राहकप्रमाणासिद्धेः। उपाधिसद्भावादपरः। अग्निषोमीया हिंसाऽधर्मसाधिका, हिंसात्वात्, क्रतुबाह्यहिंसावत्। अत्र निषिद्धत्वमुपाधिः। उपाधिश्च साध्यव्यापकत्वे सति साधनाव्यापक इत्युदयनाचार्याः। यो यद्व्यापकत्वे सति यदव्यापकः सः तत्रोपाधिरिति दीधितिः। यस्य यद्धर्मावच्छिन्नसाध्यव्यापकत्वं तद्धर्मावच्छिन्नसाधनाव्यापकत्वं च तत्साध्यतद्धेतावुपाधिरित्यर्थः ॥४।२।२९॥

साध्यविपरीतव्याप्तो हेतुर्विरुद्धः ॥४।२।३०॥

साध्यविपरीतव्याप्तः साध्याभावव्याप्तो हेतुर्विरुद्ध इति हेत्वाभासः। यथा नित्या प्रकृतिः, कृतकत्वात् कालवत्, इत्यत्र कृतकत्वं हेतुः साध्याभावव्याप्तः। यथा वा पर्वतो निरग्निर्धूमवत्त्वात्। विरुद्धोयमष्टधा—

सपक्षे सत्यसति च पृथक् पक्षविपक्षयोः।
व्याप्यव्याप्त्योर्द्वयोश्चेति विरुद्धोप्यष्टधा मतः ॥

इति कारिकोक्तरीत्या।

सत्यसति च सपक्षे सर्वपक्षावृत्तिविपक्षव्यापकाव्यापकरूपविरुद्धचतुष्टयसम्भवाद् द्वादशविधोपि विरुद्ध इति ज्ञेयम्। उदाहरणान्युह्यानि द्रष्टव्यानि वाकरग्रन्थेषु। अज्ञातसन्दिग्धविपरीतास्तिस्रोसिद्धय इति न्यायतत्त्वकाराः ॥४।२।३०॥

सव्यभिचारोऽनैकान्तिकः ॥४।२।३१॥

अनैकान्तिकसामान्यलक्षणमाह सव्यभिचार इति। अनैकान्तिको हेतुः सव्यभिचार इत्युच्यते। स्वस्थानातिक्रमरूपस्य व्यभिचारस्यासाधारणेऽप्युपपद्यमानत्वान्नाव्याप्तिः। व्यभिचारेण सह वर्तत इति सव्यभिचारः। यथा धूमवान् वह्नेः। धूमाभाववत्यङ्गारशब्दस्य वृत्तित्वाद् वह्निर्धूमव्यभिचारीति सव्यभिचारः। व्यभिचार एकत्राव्यवस्था। अव्यवस्था सत्त्वनियमाभावः। यथा धूमवत्येव वह्निर्वर्तत इति नास्ति नियमः ॥४।२।३१॥

स द्विधा साधारणोसाधारणश्च ॥४।२।३२॥

सोनैकान्तिको द्विप्रकारः। साधारणोनैकान्तिकः, असाधारणोनैकान्तिश्च ॥४।२।३२॥

पक्षसपक्षविपक्षवृत्तः साधारणः ॥४।२।३३॥

पक्षत्रयव्याप्ययम्। पक्षत्रयं तु पक्षः सपक्षो विपक्षश्चेति। विप्रतिपत्त्येककोटिः पक्षः। अथवा सिसाध-

यिपितधर्मविशिष्टो धर्मी पक्षः। यथाग्निमत्त्वादिसाधने पर्वतादिः। तथा च तादृशपर्वतादिरूपपक्षवृत्तित्वं धूमादेरस्तीति। साध्यतत्सजातीयधर्मवान् सपक्षः। यथा महानसादिः। साध्यतत्सजातीयो धर्मः पर्वतादिवृत्तिर्वह्निः। तत्सजातीयो महानसादिवृत्तिर्वह्निः। तादृशवह्निरूपधर्मवान्। तथा च तादृशमहानसादिरूपसपक्षवृत्तित्वं धूमादेरस्तीति। साध्यतत्सजातीयशून्योविपक्षः। यथा महाह्रदः। तथा च तादृशमहाह्रदरूप विपक्षावृत्तित्वं धूमस्यास्तीति ॥४।२।३३॥

सपक्षविपक्षव्यावृत्तोऽसाधारणः ॥४।२।३४॥

पक्षमात्रनिष्ठोयम्। विपक्षात्सपक्षाच्च व्यावृत्तो हेतुरसाधारणः। सपक्षविपक्षव्यावृत्तत्वे सति पक्षवृत्तिरिति यावत्। यथा शब्दो नित्यः शब्दत्वात्। अत्र सपक्षो निश्चितसाध्यवान्। विपक्षो निश्चितसाध्याभाववान्। यथा पक्षसपक्षमात्रविषयस्यान्वयस्य विपक्षवृत्तिर्व्यभिचारस्तथा सपक्षैकदेशमात्रविषयस्य व्यतिरेकस्य स्वस्थानातिक्रमेण सपक्षव्याप्तिर्व्यभिचार इत्येके ॥४।२।३४॥

द्वावप्यष्टविधौ ॥४।२।३५॥

द्वावपि साधारणासाधारणावष्टविधौ तथाहि–पक्षसपक्षविपक्षव्यापकः पक्षमात्रव्यापकः सपक्षमात्रव्यापको विपक्षमात्रव्यापको विपक्षव्यापकः पक्षेतरव्यापकः सपक्षेतरव्यापको विपक्षेतरव्यापक इत्यष्टविधः साधारणः। सपक्षरहितो विपक्षरहितः सपक्षविपक्षरहितः सपक्षविपक्षवानिति चत्वारः। पक्षव्यापकत्वतदव्यापकत्वाभ्यां पक्षरहितभेदेष्टावसाधारणा भवन्ति। तत्र पक्षत्रयव्यापकः साधारणो यथा–क्षित्यादिकं सकर्तृकं प्रमेयत्वाद् घटवदिति। तत्रैव परिमितपरिमाणत्वात्। पक्षत्रयैकदेशवृत्तिः पक्षसपक्षभूतगुणकर्मणोरवृत्तेर्विपक्षेषु च विभुष्ववृत्तेरस्य पक्षत्रयैकवृत्तित्वम्।

पक्षव्यापकः सपक्षविपक्षैकदेशवृत्तिर्यथा—पर्वताश्चूर्णीभविष्यन्ति प्रत्यक्षग्राह्यत्वाद् घटवदिति। अयं हेतुः सपक्षतयाभिमते द्व्यणुकादौ विपक्षे चेश्वरादौ न व्याप्नोति।

सपक्षव्यापक इतरैकदेशवृत्तिर्यथा—कालजीवावनित्यौ, अचेतनत्वाद् पृथिव्यादिवत्। नित्येश्वराभ्युपगमपक्षे तस्य विपक्षत्वाद् अत्राचेतनत्वस्य विपक्षैकदेशवृत्तिता।

विपक्षव्यापकः पक्षसपक्षैकदेशवृत्तिर्यथा–कालात्मानावनित्यौ, कालघटव्यतिरिक्तत्वाद् घटवत्। अत्र सपक्षे घटे पक्षे च कालघटव्यतिरिक्ततत्वं नास्ति।

एते त्रय एकैकव्यापकाः।

अथ द्विव्यापकास्त्रय उदाह्रियन्ते। तत्र पक्षेतरव्यापको यथा--अनित्यौ पृथिव्यात्मानौ, पृथिवीव्यतिरिक्तत्वात्। प्रदीपवत्।

सपक्षेतरव्यापको यथा–अनित्यः शब्दो घटव्यतिरिक्तत्वात् पटवत् ॥४।२।३५॥

उभयसाधर्म्यात्प्रक्रियासिद्धेः प्रकरणसमः ॥४।२।३६॥

प्रकरणसम एव सत्प्रतिपक्षः इति न्यायपरिशुद्धौ। तुल्यप्रमाणतयाभिमतेन प्रतिरुद्धत्वं सत्प्रतिपक्षत्वम्। सत्प्रतिपक्षस्य त्रैविध्यं यथा—

मानमाभाससंरुद्धं मानरुद्धस्तथेतरः।
आभासरुद्ध आभासः प्रतिरुद्धस्त्रिधा स्थितः॥

प्रकरणसम एव विरुद्धाव्यभिचारिशब्देन केचिदुपचरन्तीत्यपि तत्रैव। उभयसाधर्म्यादन्वयसहचाराद्व्यतिरेकसहचाराद्वा। प्रक्रिया प्रकर्षेण क्रियासाधनम्। विपरीतसाधनमितिफलितोर्थः। तत्सिद्धेस्तस्य पूर्वमेव सिद्धेरिति विश्वनाथः। अधिकबलत्वेनारोपितप्रमाणान्तरेण बाधेन प्रत्यवस्थानम्। यथा शब्दोनित्यः, कृतकत्वादित्युक्ते नैतदेवं श्रावणत्वेन नित्यत्वसाधकेन बाधात्। साध्यविपरीतसाधकहेत्वन्तरवानितिभावः। यथेश्वरोऽनित्यः नित्यधर्मरहितत्वात्। ईश्वरो नित्योनित्यधर्मरहितत्वात्। यस्य प्रतिपक्षभूतं हेत्वन्तरमस्ति स प्रकरणसमः। प्रकरणेन पक्षेण समः प्रकरणसमः। पक्षः साध्यवान्न वेति सन्दिह्यते। तदर्थं प्रयुक्तो हेतुरप्यत्र स्वसाध्यं साधयितुमीष्टे न वेति सन्दिह्यत एवेत्युभयोः समत्वं बोध्यम्। प्रकरणसमस्तु सत्प्रतिपक्षः स्वरूपासिद्ध इतिहेतोः स्वरूपाज्ञाने स्वरूपासिद्धः, पक्षसम्बन्धाज्ञाने सम्बन्धासिद्धः, पक्षैकदेशे सम्बन्धाज्ञाने भागासिद्धः, हेतुतावच्छेदकाज्ञाने विशेषणासिद्ध इत्यज्ञाननिबन्धनासिद्धा इति न्यायसारे ॥४।२।३६॥

यस्य हेतोः पक्षः साध्याभाववात् स कालात्ययापदिष्टः ॥४।२।३७॥

कालस्य साधनकालस्यात्ययेऽभावेपदिष्टः प्रयुक्तो हेतुः। यथा वह्निरनुष्णः कृतकत्वात्। कालात्ययापदिष्टः कालातीत इति गौतमः। कालात्ययेन प्रयुक्तो यस्यार्थस्यैकदेशोपदिश्यमानस्य स कालात्ययापदिष्टः कालातीत इत्युच्यते। निदर्शनम्—नित्यः शब्दः, संयोग-व्यङ्ग्यत्वात्, रूपवदिति वात्स्यायनभाष्यम्। कालात्यये हेतुप्रयोगयोग्य-क्षनिष्ठ-नालनन्दैः-कालातीतनिदिष्टः प्रयुक्तो हेतुरिनिन्यायसारे ॥४।२।३७।

इति चतुर्थेऽध्याये द्वितीयः पादः

चतुर्थोऽध्यायः समाप्तः

अथ पञ्चमेऽध्याये प्रथमः पादः

अथ च्छलम् ॥५।१।१॥

अथ सामान्येन च्छलं विव्रियते। निग्रहस्थानविवेचनात्पूर्वं क्रमप्राप्ते छलजाती अपि विवेचनीये। यद्यपि श्रीवैष्णवधर्मः सर्वथा पवित्रो धर्मः। तत्र छलज्ञानं नार्हति स्थानम्। तस्येह संग्रहो नौचित्यमाचिनुते। ननु छलिनोऽपि दृश्यन्ते श्रीवैष्णवास्तर्हि च्छलज्ञानत्यागो नावश्यकः। सत्यम्। श्रीवैष्णवाश्छलिनो न श्रीवैष्णवसम्प्रदायश्छली। अयं ग्रन्थो न श्रीवैष्णवनिरूपणपरः किन्तु श्रीसम्प्रदायतत्त्वरत्ननिरूपणपरः। सिद्धान्ते न स्याच्छलसंग्रहः। कश्चिदज्ञः श्रीवैष्णवो नितरां स्वरूपाज्ञानपराहतः स्वसिद्धान्ताज्ञानपराहतश्चाधिसमं पराजयपदं स्प्रक्ष्यन्नपि छलेन च्छलिनं न च्छलयेत्। पराजयस्तु सोढव्यः। छलेन सत्यमाच्छन्नं भवति। तदतीव दुःखदं मनस्तोदं च। तथापि च्छलस्य स्वरूपं त्वधिगन्तव्यमेव। तत्स्वरूपमधिगतवतोत्र श्रीवैष्णवस्य न स्यात्पराजयः सुगमः। छलिनश्छलमधिगन्तुं छलवेदनं नावितथम्। मा भूवञ्छ्रीवैष्णवाश्छलिनः परन्तु, यदि कदाचिच्छलाच्छन्नो विपक्षी छलयेदच्छलिनं तदानीं छलपद्धतितत्तिज्ञानं भवेदेवावश्यकम्। चौर्यं परिज्ञातुमचोरेण चोरेण भाव्यमिति नोच्यते मया। व्यभिचारं परिचेतुं केनचिद्व्यभिचारिणा भाव्यमिति न प्रस्थाप्यते मया। छलिस्वरूपं त्वधिगन्तव्यमेवेत्युच्यते मया। छलिनां छलमबलमेव स्यादिति तु न मनसि कर्तव्यम्। सबलमपि तद्दूषयितुमर्हति। अतस्तज्ज्ञानस्य विरतौ न रतौ राध्येति निश्चित्य सामान्येनात्र छलं जातिश्चापि निरूप्येते। यदि स्यादत्र पदं निदधतो मम कश्चित्प्रत्यवायस्तर्हि कृपणकन्याय एव शरण्यो मे शरणं स्यात्। छलं छलयतामस्मीतिविस्पष्टं घोषयतो भगवतश्छलरूपस्य दर्शनं स्यादित्यपरो लाभः ॥५।१।१॥

वचनविघातोऽर्थविकल्पोपपत्त्या छलम् ॥५।१।२॥

अर्थविकल्पोपपत्त्या अर्थविकल्पोऽर्थभेदः। उपपत्तिरुपपादनम्। अर्थभेदोपपादनेन वचनविघातो वक्तुरनभिप्रेतार्थसम्पादनेनेष्टार्थनिवर्तनं छलम्। यथा नवं कम्बलं दधानं कंचिदालोक्य "नवकम्बलोऽयम्" इति ब्रुवाणं प्रति ब्रूते कश्चिन्नायं नवकम्बल एककम्बल एवेति। अत्र नवत्वसंख्यानुपपत्तिप्रदर्शनेन वाक्यविरोधप्रदर्शनं छलमिति ज्ञेयम्। "अनिष्टमर्थमारोप्य तान्निषेधश्छलं मत"मिति तार्किकरक्षा ।५।१।२॥

तत् त्रिविधं वाक्छलं सामान्यच्छलमुपचारच्छलं चेति ॥५।१।३॥

एतत्सूत्रं स्पष्टार्थम् ॥५।१।३॥

वाक्छलं लक्षयति—

अविशेषाभिहितेऽर्थे वक्तुरभिप्रायादर्थान्तरकल्पना वाक्छलम् ॥५।१।४॥

अविशेषः सामान्यम् । सामान्यरूपेणाभिहितेऽर्थे वक्तुरभिप्रायादितरस्यार्थस्य कल्पना वाक्छलमुच्यते । नवकम्बलो ऽयमित्युदाहरणम् । शब्दवृत्तिव्यत्ययेन प्रतिषेधहेतुरिति सर्वदर्शनसंग्रहः ॥५।१।४।

संभवतोऽर्थस्यातिसामान्ययोगादसंभूतार्थकल्पना सामान्यच्छलम् ॥५।१।५॥

सामान्यनिमित्तं छलं सामान्यच्छलम् । अतिसामान्ययोगादतिसामान्यस्य ब्राह्मणत्वादिधर्मस्य सम्बन्धाद्यऽसंभूतार्थकल्पना तत्सामान्यच्छलम् । यथा—ब्राह्मणोऽयं विद्याचरणसंपन्नः केनचिदित्युक्तेऽपरः कश्चिदाह यदि ब्राह्मणे विद्याचरणसंपत् तर्हि व्रात्येऽपि सा स्यात् सोऽपि ब्राह्मणः । व्रात्यस्य ब्राह्मणत्वेऽपि उपनयनादिसंस्काराभावाद्वस्तुतस्तस्य विद्याचरणसंपन्न संभवति । तत्रातिसामान्यं ब्राह्मणत्वमाश्रित्यासंभूतार्थस्य व्रात्ये विद्याचरणसंपदो या कल्पना तत्सामान्यच्छलम् ॥५।१।५॥

धर्मविकल्पनिर्देशेऽर्थसद्भावप्रतिषेध उपचारच्छलम् ॥५।१।६॥

धर्मविकल्पनिर्देशे शक्तिलक्षणयोरन्यतरवृत्त्या निर्देशे प्रयोगे कृते सति शक्त्या शब्दप्रयोगे कृते लक्षणया योऽर्थसद्भावस्य प्रतिषेधः, तथा लक्षणया शब्दप्रयोगे कृते सति शक्त्या यस्तदर्थसद्भावस्य प्रतिषेधस्तदुपचारच्छलं विज्ञेयम् । यथा गङ्गायां मीन इत्युक्ते गङ्गापदलक्षणया यो गङ्गातीरे मीनसद्भावप्रतिषेधस्तदुपचारच्छलम् । एवं गङ्गायां घोष इत्युक्ते न गङ्गायां घोषः संभवति, इति शक्त्या यो गङ्गाप्रवाहे घोषसद्भावप्रतिषेधेस्तदुपचारच्छलम् ॥५।१।६॥

जातिः ॥५।१।७॥

कथंचिदावश्यकमनुभूय जातिर्विधियते । सा चासदुत्तररूपा स्वव्याघातकोत्तररूपा वा । साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानं जातिरिति गौतमः । अन्वयव्याप्त्या साध्यसाधने कृते प्रतिवादिना यत्तत्र व्यतिरेकव्याप्त्या साध्यानुपत्तिप्रदर्शनं जातिरिति गौतमहृदयम् । अत्र वात्स्यायनः— प्रयुक्ते हि हेतौ यः प्रसङ्गो जायते सा जातिः । स च प्रसङ्गः साधर्म्यवैधर्म्याभ्यां प्रत्यवस्थानमुपालम्भः प्रतिषेध इति । उदाहरणसामर्थ्यात्साध्यसाधनं हेतुरित्यस्योदाहरणवैधर्म्येण प्रत्यवस्थानम् । उदाहरणवैधर्म्यात्साध्यसाधनं हेतुरित्यस्योदाहरणवैधर्म्येण प्रत्यवस्थानम् । प्रत्यनीकभावाज्जायमानोर्थो जातिरिति । प्रत्यनीकभावाद्विरोधाद् बाधाश्रितसाध्यसाधनप्रकारापेक्षया विरुद्धप्रकाराज्जायमानोर्थः साध्यप्रतिषेध एव जातिरिति निगूढार्थः । जातिर्व्याप्तिनिरपेक्षेति विश्वनाथः । जातिर्बहुभेदभिन्ना । तथाहि— साधर्म्यसमा, वैधर्म्यसमा, उत्कर्षसमा, अपकर्षसमा, वर्ण्यसमा, अवर्ण्यसमा, विकल्पसमा, साध्यसमा, प्राप्तिसमा, अप्राप्तिसमा, प्रसङ्गसमा, प्रतिदृष्टान्तसमा, अनुत्पत्तिसमा, संशयसमा, प्रकरणसमा, अहेतुसमा, अर्थापत्तिसमा, अविशेषसमा, उपपत्तिसमा, उपलब्धिसमा, अनुपलब्धिसमा, नित्यसमा, अनित्यसमा, कार्यसमेति चतुर्विंशतिर्ज्ञातयः । एतासां लक्षणमुदाहरणं चाकरग्रन्थेभ्योऽध्यापकमहोदयेभ्यो वावगन्तव्यम् । विस्तरभिया नात्र प्रपञ्च्यते ॥५।१।७॥

अथ निग्रहस्थानम् ॥५।१।८॥

निग्रहस्थानं खलु पराजयप्राप्तिरिति वात्स्यायनः । निग्रहस्य खलीकारस्य स्थानमिति वृत्तिकारो विश्वनाथः । स्थानं ज्ञापकम् । उद्देश्यानुगुणसम्यग्ज्ञानाभावलिङ्गत्वं प्रतिज्ञाहान्याद्यन्यतमत्वं वा लक्षणमित्यपि विश्वनाथः । अपजयहेतुर्निग्रहस्थानमिति च । वादिनोपजयहेतुः शब्दप्रयोग इति वा । विप्रतिपत्तिरप्रतिपत्तिश्च निग्रहस्थानम् इति गौतमः । विप्रतिपत्तिर्विरुद्धा प्रतिपत्तिः । अप्रतिपत्तिः प्रकृताज्ञानम् । तथा च विप्रतिपत्त्यप्रतिपत्त्योरन्यतरोन्नायकधर्मवत्त्वम् । यद्वा विपरीता वा कुत्सिता वा प्रतिपत्तिर्विप्रतिपत्तिः । विप्रतिपद्यमानः पराजयं प्राप्नोति । निग्रहस्थानं खलु पराजयप्राप्तिरिति वात्स्यायनः ॥५।१।८॥

प्रतिज्ञाहानिः प्रतिज्ञान्तरं प्रतिज्ञाविरोधः प्रतिज्ञासंन्यासो हेत्वन्तरम् अर्थान्तरं निरर्थकम् अविज्ञातार्थम् अपार्थकम् अप्राप्तकालं न्यूनम् अधिकं पुनरुक्तम् अननुभाषणम् अज्ञानम् अप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणम्, निरनुयोज्यानुयोगोऽपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि ॥५।१।९॥

एतानि द्वाविंशतिर्निग्रहस्थानानि गौतमोक्तानि ॥५।१।९॥

प्रतिज्ञातार्थपरित्यागः प्रतिज्ञाहानिः ॥५।१।१०॥

प्रतिज्ञातस्यार्थस्य परित्यागः प्रतिज्ञाहानिः । स्वपक्षे परपक्षधर्माभ्यनुज्ञा प्रतिज्ञाहानिः । स्वयं विधिप्याभिहितपरित्याग इति फलितार्थः । सेयं पक्षहेतुदृष्टान्तसाध्यतदन्यहानिभेदात्पञ्चधेति विश्वनाथः ॥५।१।१०॥

परोक्तदोषोद्दिधीर्षया पूर्वानुक्तविशेषणविशिष्टतया प्रतिज्ञातार्थकथनं प्रतिज्ञान्तरम् ॥५।१।११॥

परैरुक्तानां दोषाणामुद्दिधीर्षया पूर्वानुक्तैर्विशेषणैर्विशिष्टतया प्रतिज्ञातार्थस्य कथनं प्रतिज्ञान्तरमित्युच्यते ॥५।१।११॥

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधः ॥५।१।१२॥

इदं गौतमसूत्रम् । अत्र प्रतिज्ञाहेतुपदे कथाकालीनवाक्यपरे । तथा च कथायां स्ववचनार्थविरोधः प्रतिज्ञाविरोध इति विश्वनाथः ॥५।१।१२॥

पक्षप्रतिषेधे प्रतिज्ञातार्थापनयनं प्रतिज्ञासंन्यासः ॥५।१।१३॥

स्वोक्तेर्थे परेण दूषिते तदपलापः प्रतिज्ञासंन्यासः । पक्षस्य स्वाभिहितस्य परेण प्रतिषेधे कृते सति तत्परिजिहीर्षया प्रतिज्ञातार्थस्यापनयनमपलापः प्रतिज्ञासंन्यास इति विश्वनाथः ॥५।१।१३॥

परोक्तदूषणोद्दिधीर्षया पूर्वोक्तहेतुकोटौ विशेषणान्तरोपादानं हेत्वन्तरम् ॥५।१।१४॥

परोक्तदूषणोद्दिधीर्षया तत्रैव हेतौ पूर्वोक्तहेतुतावच्छेदकातिरिक्तहेतुतावच्छेदकविशिष्टवचनं हेत्वन्तरम् ॥५।१।१४॥

प्रकृतादर्थादप्रतिसम्बद्धार्थमर्थान्तरम् ॥५।१।१५॥

प्रकृतोपयुक्तमर्थमपेक्ष्यानभिधेयार्थाभिधानमर्थान्तरम् । प्रकृतानुपयुक्तार्थकथनमर्थान्तरमिति तात्पर्यम् ॥५।१।१५॥

अवाचकपदप्रयोगो निरर्थकम् ॥५।१।१६॥

स्पष्टम् ॥५।१।१६॥

परिषत्प्रतिवादिभ्यां त्रिरभिहितमप्यविज्ञातमविज्ञातार्थम् ॥५।१।१७॥

परिषत्प्रतिवाद्यबोधप्रयोजकपदप्रयोगोऽविज्ञातार्थम् ॥५।१।१७॥

परस्परानन्वितार्थकपदसमूहोऽपार्थकम् ॥५।१।१८॥

पौर्वापर्यायोगादनिगमनाद्वाऽपार्थं हानिनिन्यायसूत्रम् । पौर्वापर्यं कार्यकारणभावः । तस्यायोगादसम्भवाच्छब्दबोधजनकाकाङ्क्षाज्ञानाद्यभावादिति फलितार्थ इति विश्वनाथः ॥५।१।१८॥

अप्राप्तकालं लक्षयति—

अवयवविपर्यासवचनमप्राप्तकालम् ॥५।१।१९॥

अवयवस्य कथैकदेशस्य विपर्यासो वैपरीत्यम् । तथा च समयबन्धविपर्यासभूतकथाक्रमविपरीतक्रमेणाभिधानं पर्यवसन्नमितिविश्वनाथः । अवयवानां व्युत्क्रमेण कथनमप्राप्तकालमितियावत् ॥५।१।१९॥

न्यूनं लक्षयति—

हीनमन्यतमेनाप्यवयवेन न्यूनम् ॥५।१।२०॥

प्रतिज्ञादीनामवयवानामन्यतमेनाप्यवयवेन हीनं न्यूनमिति वात्स्यायनः । अवयवपञ्चकमध्ये एकतमस्याप्यनुपादाने विवक्षितार्थासिद्धिरितितात्पर्यम् ॥५।१।२०॥

अधिकं लक्षयति—

हेतूदाहरणाधिकमधिकम् ॥५।१।२१॥

अधिकहेत्वादिकथनमधिकम् । दूषणाद्यधिकमपि बोध्यमितिवृत्तिः ॥५।१।२१॥

इति पञ्चमेऽध्याये प्रथमः पादः

अथ पञ्चमाध्याये द्वितीयः पादः

निग्रहस्थानेषु पुनरुक्तं लक्षयति—

शब्दार्थयोः पुनर्वचनं पुनरुक्तमन्यत्रानुवादात् ॥५।२।१॥

निष्प्रयोजनं पुनरभिधानं पुनरुक्तम्। अनुवादस्तु व्याख्यारूपः सप्रयोजनक एव। तथा च समानार्थकपूर्वानुपूर्वीकशब्दप्रयोगः शब्दपुनरुक्तम्। समानार्थकभिन्नानुपूर्वीकशब्दस्य निष्प्रयोजनं पुनरभिधानमर्थपुनरुक्तम्। अनुवादं विना कथितस्य पुनः कथनं पुनरुक्तमितिभावः ॥५।२।१॥

पुनरुक्तमेव पुनर्निरूपयति—

अर्थादापन्नस्य स्वशब्देन पुनर्वचनम् ॥५।२।२॥

पुनरुक्तमित्यनुवर्तते। यस्मिन्नुक्ते यस्यार्थस्यौत्सर्गिकी प्रतिपत्तिर्भवति तस्य तेन रूपेण पुनरभिधानं पुनरुक्तम्। इदमेव चार्थपुनरुक्तमिति गीयते। यथा वह्निरुष्ण इति पूर्वपदाक्षिप्तोक्तिरियम्। उष्णो वह्निरित्युत्तरपदाक्षिप्तोक्तिः। एवं बहिरस्ति गेहे नास्तीति विध्याक्षिप्तोक्तिः। जीवन् गेहे नास्ति बहिरस्तीति निषेधाक्षिप्तोक्तिः ॥५।२।२॥

अननुभाषणमाह—

विज्ञातस्य परिषदा त्रिरभिहितस्याप्यप्रत्युच्चारणमननुभाषणम् ॥५।२।३॥

त्रिरभिधानेपि यत्रानुभाषणविरोधी व्यापारस्तत्राननुभाषणं निग्रहस्थानं वेदितव्यम्। परिषदा त्रिभिरभिहितस्याप्यननुवादोननुभाषणमित्यर्थः ॥५।२।३।

अज्ञानमाह—

अविज्ञातं चाज्ञानम् ॥५।२।४॥

अविज्ञातमिति भावे क्तः। चकारः परिषदा विज्ञातस्येत्याद्यनुकर्षणार्थः। तथा च परिषदा विज्ञातस्य वादिना त्रिरभिहितस्याप्यविज्ञातमित्यर्थः ॥५।२।४॥

अप्रतिभामाह—

उत्तस्याप्रतिपत्तिरप्रतिभा ॥५।२।५॥

परपक्षप्रतिषेध उत्तरम्। परोक्तं बुद्ध्वापि यत्रोत्तरसमय उत्तरं न प्रतिपद्यते तत्राप्रतिभानिग्रहस्थानम् ॥५।२।५॥

विक्षेपमाह—

कार्यव्यासङ्गात्कथाविच्छेदो विक्षेपः ॥५।२।६॥

कार्यव्यासङ्गादिति ल्यब्लोपे पञ्चमी। तथा च कार्यव्यासङ्गमुद्भाव्य कथाविच्छेदो विक्षेपः ॥५।२।६॥

मतानुज्ञामाह—

स्वपक्षदोषाभ्युपगमात्परपक्षे दोषप्रसङ्गो मतानुज्ञा ॥५।२।७॥

यः परेण चोदितं दोषं स्वपक्षेभ्युपगम्यानुद्धृत्य वदति भवत्पक्षेपि समानो दोष इति स स्वपक्षे दोषाभ्युपगमात्परपक्षे दोषं प्रसञ्जयन् परमतमनुजानातीति मतानुज्ञा नाम निग्रहस्थानम् ॥५।२।७॥

पर्यनुयोज्योपेक्षणं लक्षयति—

निग्रहस्थानप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणम् ॥५।२।८॥

पर्यनुयोज्यो नाम निग्रहोपपत्त्या चोदनीयः। तस्योपेक्षणं निग्रहस्थानं प्राप्तोसीत्यननुयोगः। उद्भावनार्हपरकीयनिग्रहस्थानानुद्भावनं पर्यनुयोज्योपेक्षणम्। वादिना साधनाभासोपन्यासे कृते प्रतिवादिन उत्तराप्रतिपत्तिरित्यपि तत् ॥५।२।८॥

निरनुयोज्यानुयोगमाह—

अनिग्रहस्थाने निग्रहस्थानाभियोगो निरनुयोज्यानुयोगः ॥५।२।९॥

अवसरे यथार्थनिग्रहस्थानोद्भावनातिरिक्तं यन्निग्रहस्थानोद्भावनं तदित्यर्थः। सोयं चतुर्धा—छलं, जातिः, आभासः, अनवसरग्रहणं चेति। "वचनविघातोर्थविकल्पोपपत्त्या छलम् (न्या० १।२।१०)। "समानप्रसवात्मिका जातिः" (न्या० २।२।६८)। समानाकारबुद्धिजननयोग्यत्वमित्यर्थः। आभासो व्यभिचारादावसिद्धयाद्युद्भावनम्। अनवसरग्रहणं चाकाल एवोद्भावनम् ॥५।२।९॥

सिद्धान्तमभ्युपेत्यानियमात्कथाप्रसङ्गोपसिद्धान्तः ॥५।२।१०॥

कस्यचिदर्थस्य तथाभावं प्रतिज्ञाय प्रतिज्ञातार्थविपर्ययादनियमात्कथां प्रसञ्जयतोपसिद्धान्तो वेदितव्यः। कथायां स्वीकृतसिद्धान्तप्रच्यवोपसिद्धान्त इति भावः। एकं सिद्धान्तमाश्रित्य कथाप्रवृत्तौ तद्विरुद्धसिद्धान्तमालम्ब्योत्तरदानमपसिद्धान्त इति निष्कर्षः ॥५।२।१०।

हेत्वाभासाश्च तथोक्ताः ॥५।२।११॥

हेत्वाभासाश्च निग्रहस्थानानि। हेत्वाभासाश्च येन रूपेण पूर्वमुक्तास्तेनैव रूपेण तेषां निग्रहस्थानत्वमिति ॥५।२।११।

इति श्रीकाशीपण्डितसभया पण्डितराज इति-सारस्वतसार्वभौम
इति चोपाधिद्वयालङ्कृतेन स्वामिश्रीभगवदाचार्येण
प्रणीते विशिष्टाद्वैतदर्शने पञ्चमाध्याये
द्वितीयः पादः

—:o:—

समाप्तं चेदं विशिष्टाद्वैतदर्शनम्

★